॥ ओ३म् ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥ (हितोपदेश)
गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरूषाः सुरत्वात्॥
(श्रीमद् भागवत्)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
नित्यो धर्मः सुदुःखे त्वनित्ये जीवो नित्यो हेतुस्य त्वनित्यः।
त्वक्वानित्यं प्रतितिष्ठस्व नित्ये सन्तुष्य त्वं तोषपरो हि लाभः॥
अप्राप्तकालं वचनं बृहस्पतिरपि ब्रूवन।
लभते बुदह यवज्ञानभवमानं च भारत॥
(विदुर नीति)

卐 वर्षम्-१५ 卐 अंकः-०१ (३३७) नवदेहली 卐 १ जुलाईमासः २०२५तः १५ जुलाईमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८२ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२५ 卐 पृष्ठम्-८

## सनातनशाश्वतसत्यस्य अवधारणा एव योगधर्मः अस्ति-स्वामी रामदेवः

कुरुक्षेत्रम्। योगगुरोः स्वामिनः रामदेवस्य नेतृत्वे एकादशः अन्ताराष्ट्रिययोगदिवसः पतञ्जलियोगपीठेन हरियाणायाः आयोगेन (आयुषविभागेन) च संयुक्तरूपेण कुरुक्षेत्रनगरे भव्यतया आयोजितः। अस्मिन्नवसरे स्वामी रामदेवः, आचार्यबालकृष्णः च हरियाणाराज्यस्य माननीयमुख्यमन्त्रिणा श्रीनायाबसिंहसैनीनाम्ना सह ब्रह्मसरोवरस्य पवित्रे क्षेत्रे योगसाधकान् योगाभ्यासं कर्तुं प्रेरितवन्तः।



एतेन सह पतञ्जलियोगसमितेः माध्यमेन राष्ट्रस्य सर्वेषु ६५० जनपदेषु योगनवाचारानुसारं निःशुल्कं योगप्रशिक्षणं दत्तम्। कुरुक्षेत्रस्य पुण्यभूमौ लक्षाधिकाः योगसाधकाः एकत्र योगाभ्यासं कृत्वा नवं कीर्तिमानं स्थापितवन्तः। कार्यक्रमे स्वामी रामदेवः सर्वान् साधकान् योगस्य स्वदेशीं जीवनशैलीं कर्तुं प्रेरितवान्।

तेन उक्तं "संपूर्णे विश्वस्मिन् अधुना द्विशतकोट्यधिकाः जनाः योगं कुर्वन्ति। योगः अधुना युगधर्मः जातः। योग एव सनातनस्य शाश्वतसत्यरूपः अस्ति। संस्कृति-आधारितसमृद्धेः मूलं योगः एव। 'निक्षेपेण सह विकासः' इति उद्घोषवाक्यम् अस्माकं योगियोगिना माननीयप्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना प्रदत्तम्।"

शेषभागःद्वितीयेपुटे

## 'अनन्तश्रीविभूषित-जगद्गुरोः श्रीदेवादित्यानन्दसरस्वती-महाराजस्य सान्निध्ये एकदिवसीया विद्वद्गोष्ठी आयोजिता'

नवदिल्ली (डॉ. देवेन्द्रप्रसादमिश्रः)। देवनदी-यमुनायाः निगमबोधतीर्थक्षेत्रे स्थिते वासुदेवघाटस्य समांतरघाटस्य नामकरणं धर्मसम्राट् स्वामी श्रीकरपात्रीमहाभागस्य नाम्नि कर्तुं एकदिवसीया विद्वद्गोष्ठी विक्रमाब्दे २०८२, आषाढकृष्ण-अमावास्यायां, बुधवासरे, तद्युक्ते २५/०६/२०२५ दिनाङ्के, धर्मसंघे, सिविल लाइन्स, दिल्ली इत्यस्मिन् स्थले अनन्तश्रीविभूषित-जगद्गुरोः श्रीदेवादित्यानन्दसरस्वतीमहाराजस्य अध्यक्षतायां प्रो. देवेन्द्रमिश्रस्य (वेदविभागाध्यक्षः, श्रीलालबहादुरशास्त्री-केंद्रीयसंस्कृतविश्वविद्यालयः) संरक्षणे च विधिवत् सम्पन्ना।



गोष्ठ्याः शुभारम्भः आचार्य-मधुसूदनमहाभागेन मंगलाचरणेन कृतः। गोष्ठ्याः मुख्य-अतिथिरूपेण श्रीसत्येन्द्रत्रिपाठी (पूर्वसंगठनमन्त्री-भाजपा, पूर्वोत्तरक्षेत्रम्; वर्तमाने -अंताराष्ट्रियसंबंधसमन्वयकः) भाषमाणः उक्तवान् – 'एषा भूमिः स्वामीकरपात्रीमहाराजेन तपसा पवित्रीकृता। ते धर्मस्य, संस्कृतेः, च संस्कृतभाषायाः महान् संवाहकाः आसन्। सनातनधर्मस्य रक्षणे तेषां योगदानम् अविस्मरणीयम्। अतः, एषा तपोभूमिः स्वामिनः नाम्ना नामितव्या। एषः महान् यत्नः शीघ्रमेव सम्पन्नः भविष्यति।' गोष्ठ्याः सारस्वतातिथिरूपेण श्रीदयानिधिउर्मलियामहाभागः (स्वयंसेवकः, नागपुरमुख्यालयः)

शेषभागःतृतीयेपुटे

## नेपालदेशस्य राजधान्यां काठमाण्डूनगरे पञ्चदिवसात्मकम् ऊनविंशं विश्वसंस्कृतसम्मेलनम् सुभव्यं सञ्जातम्






अस्य विश्वसंस्कृतसंमेलनस्य उद्घाटने नेपालदेशस्य महामहिमराष्ट्रपतिः श्रीमान् रामचन्द्र-पाण्डेल-महोदयः, आध्यात्मिकः गुरुः श्रीचिन्ना-जीयर-स्वामि-वर्यः, नेपालदेशस्य सर्वकारस्य संस्कृतिमन्त्री श्रीबद्री-प्रसाद-पाण्डे-महोदयः, नेपाल-संस्कृत-विश्वविद्यालयस्य उपकुलपतिः आचार्यः श्रीमान् धनेश्वर-महोदयः, भारतदेशस्य राजधान्यां दिल्लीनगरस्य केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतिः आचार्यः श्रेनिवास-बरखेड़ीमहोदयः, विश्व-संस्कृत-संमेलनस्य अध्यक्षा श्रीमती दिप्तीत्रिपाठि-महोदया चासन्। अवसरेऽस्मिन् निखिलात् विश्वात् अनुमानतः पञ्चाशत् देशेभ्यः संस्कृतस्य अध्येतारः अनुसन्धातारः संस्कृतानुरागिनः समिपस्थिताः सन्ति स्म।

समापनसमारोहे आचार्यः श्रेनिवास-बरखेड़ीमहोदयः, नेपाल-संस्कृत-विश्वविद्यालयस्य उपकुलपतिः आचार्यः श्रीमान् धनेश्वरमहोदयः, नेपाल-आस्ट्रेलिया- नेशनल- विश्वविद्यालयस्य आचार्यः मैकामस-टेलर-महोदयः, प्रख्यात-संस्कृत-विद्वान् आचार्यः हरिदत्त-शर्ममहोदयः तथा च केन्द्रीय संस्कृत-विश्वविद्यालयस्य श्रीमान् काशीनाथन्यूपाने-वर्यः समवेता चासन्।

## 'महाकविः कालिदासः संस्कृतभाषायाः विश्वप्रतिष्ठां सम्पादितवान्'-प्रो. हरेकृष्ण अगस्ती

(रामटेकनगरम्) कविकुलगुरुः कालिदासः इत्यस्य नाम्ना संस्थापिते कालिदाससंस्कृतविश्वविद्यालये



रामटेकमुख्यालये, आषाढमासस्य प्रथमदिने गुरुवासरे दिनाङ्के २६ जुलै २०२५ तमे, महाकविकालिदासदिवसः अत्युत्साहेन आचरतः।

शेषभागःद्वितीयेपुटे

# बालभारतीपब्लिकविद्यालये समायोजितः एकादशः अन्तर्राष्ट्रीययोगदिवसः

संवाददाता –सौरभः दे

संयुक्तराष्ट्रसंघेन प्रस्तावितम् 'अंतर्राष्ट्रीययोगदिवसः' प्रतिवर्षं जून्-मासस्य एकविंशतितमे दिनाङ्के समारभ्य सर्वत्र विश्वे आयोज्यते। अस्य एकादशस्य संस्करणस्य अवसरः एनटीपीसी-दर्लिपर्लिस्थित-बालभारतीपब्लिकविद्यालयमध्ये अपि उत्साहेन आचरितः। अस्य कार्यक्रमस्य



उद्घाटनं प्रधानाचार्यमहोदयेन नीरजया मन्त्रः कृतः। ततः अनन्तरं योगशिक्षकेन अनिलमहोदयेन द्वारा विविधयोगासनानां प्रदर्शनं कृतम्। छात्राः, शिक्षकवर्गः च उत्साहपूर्वकं भागं स्वीकृतवन्तः। वृश्चिकासनम्, ताड़ासनम्, भुजङ्गासनम्, प्राणायामः, ध्यानक्रियाः च प्रमुखं प्रदर्शनम् अभवत्। कार्यक्रमे योगस्य शारीरिकं मानसिकं च लाभं विषये विवेचनं अपि अभवत्प्रधानाचार्या उक्तवती यत् –"योगः भारतस्य अमूल्यं दानम् अस्ति। अस्य अभ्यासेन न केवलं शरीरेण अपि मनसा च मानवः सशक्तः भवति।"अन्ते धन्यवादप्रस्तावेन सह कार्यक्रमः समापनम् अगच्छत। सर्वे छात्राः योगस्य महत्वं ज्ञात्वा प्रतिदिनं योगाभ्यासं कर्तुं संकल्पं कृतवन्तः।

# विवेकानन्दसभागारे योगसङ्गम इति कार्यक्रमस्य भव्यमायोजनम्

भारतसर्वकारस्य शिक्षामन्त्रालयस्य निर्देशानुसारं श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालये २१ जून २०२५ दिनाङ्के विवेकानन्दसभागारे प्रातः ०६:३० वादनतः ०९:०० वादनपर्यन्तं विश्वविद्यालयस्य कुलपतिः प्रो.मुरलीमनोहरपाठकस्य आध्यक्ष्ये योगसङ्गमकार्यक्रमस्य आयोजनं कृतम्। सर्वप्रथमं आदरणीयप्रधानमन्त्रिणः योगसन्देशस्य प्रसारणं दूरदर्शनद्वारा श्रूयते स्म, तदनन्तरं प्रोटोकॉलानुसारं योगाभ्यासान्तर्गतं



विविधानि आसनानि प्राणायामाश्च कृताः। तदनन्तरं कार्यक्रमे मुख्यवक्तृरूपेण समागतः श्रीशैलजानन्दमिश्रः अस्मिन् वर्षे 'योगथीम-विषये' प्रकाशं क्षिपन् उक्तवान् यत् पृथिव्याः रक्षणेन एव मनुष्याणां रक्षणं कर्तुं शक्यते तथा च योगद्वारा एव जगति प्रसारयितुं शक्यते। मुख्यातिथिरूपेण आगतः स्वामिविवेकभारतीमहोदयेन उक्तं यत् योगद्वारा आध्यात्मिकं शक्तिम् उन्नयनं कृत्वा जगतः कल्याणं कर्तुं शक्यते। अध्यक्षत्वेन विश्वविद्यालयस्य कुलपतिः प्रो.पाठकमहाभागेन उक्तं यत् अस्मिन् वर्षे माननीयप्रधानमन्त्री 'योगसङ्गमः' इति विषयस्य केन्द्रे सम्पूर्णं विश्वं संयोजयितुं भावनां प्रसारितवान्। कुलपतिः समाजे योगस्य प्रचारं प्रसारणं च कर्तुं बलं दत्तवान्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य २०० तः अधिकाः शिक्षकाः, अधिकारिणः, कर्मचारिणः, योगानुरागिणश्च भागं गृहीत्वा योगमहोत्सवस्य आनन्दं लब्धवन्तः। अस्मिन् अवसरे समन्वयकः प्रो.मार्कण्डेयनाथतिवारी एवं सहसमन्वयकः डॉ.रमेशकुमारं सहितं अन्ये विभागीयशिक्षकाः समुपस्थिता आसन्। अस्य कार्यक्रमस्य समापनं शान्तिपाठेन सर्वेषां स्वास्थ्यरक्षणस्य कामनायाम् अभवत्।

---

प्रथमपुटस्य शेषभागः **'महाकविः कालिदासः संस्कृतभाषायाः....**

कुलपतिः (प्रभारी) च रामटेकपरिसरनिर्देशकः च प्रो. हरेकृष्णअगस्ती विश्वविद्यालयपरिसरे महाकवेः कालिदासस्य पूर्णाकृतेः सम्मुखे सस्नेहं पुष्पाञ्जलिम् अर्पितवान्।

एवमेव कुलसचिवः (प्रभारी) डॉ. रोशन अलोने, शिक्षासंकायस्य अधिष्ठात्री प्रो. ललिता जोशी, विश्वविद्यालय-नियोजन-विकास-मण्डलस्य निर्देशकः प्रो. प्रसाद गोखले, आधुनिकभाषाविभागाध्यक्षः प्रो. पराग जोशी च सहिताः सर्वे संवैधानिक-प्रशासनिकाधिकारिणः कार्यालय-सहयोगिनश्च महाकवये कालिदासाय श्रद्धापूर्वकं पुष्पाञ्जलिं अर्पितवन्तः। कुलपतिः (प्रभारी) प्रो. हरेकृष्णअगस्ती महाकवेः कालिदासस्य मेघदूतकाव्ये अन्तर्निहितं सौन्दर्यं प्रकाशयन् व्याख्यानं दत्तवान्। तेन उक्तं–'महाकविः कालिदासः अस्माकं विश्वविद्यालयस्य प्रेरणापुरुषः अस्ति। तेन विरचितानि सप्त काव्यानि तं न केवलं भारतवर्षे अपि तु समग्रे विश्वे प्रसिद्धं कृतवन्ति। कालिदासस्य साहित्येन संस्कृतभाषा वैश्विकपटलपर्यन्तं प्रतिष्ठां प्राप्तवती। अस्माकं विश्वविद्यालयः कालिदाससाहित्यस्य संवर्धने सदा अग्रगण्यः आसीत्। अतो हि–सप्तखण्डेषु कालिदाससाहित्यस्य मराठीभाषायाम् अनुवादः, कालिदासमहाकाव्येषु आधारितं लघुपटम्, कालिदाससाहित्ये आधारिताः व्याख्यानानि, गोष्ठयः, सम्मेलनानि च निरन्तरं आयोज्यन्ते। कालिदासनामकेन स्थापितं अस्माकं विश्वविद्यालयं कालिदासस्य च संस्कृतस्य च उत्कर्षाय निःशङ्कं समर्पितम् अस्ति।' एतेन सह संस्कृतभाषा-साहित्यविभागेन 'आषाढस्य प्रथमदिवसे' इति विशेषविषये विशिष्टव्याख्यानम् आयोज्यते स्म। तस्मिन् व्याख्याने विभागाध्यक्षः च संस्कृतसाहित्यविशारदः च प्रो. पराग जोशी महोदयः कालिदासस्य रामटेकनगरेण सह ऐतिहासिकं सम्बन्धम् प्रतिपाद्य महाकविने लिखितस्य मेघदूतकाव्यस्य सौन्दर्यं विस्तारतया प्रकाशितवान्। अभिनवभारती, वारंगा, रत्नागिरी इत्यादिषु उपकेन्द्रेषु अपि महाकवये कालिदासाय सादरं वन्दनं समर्पितम्।

# भारतीयज्ञानपरम्परायां योगस्य महती भूमिका - कुलपतिः

## स्वस्थे शरीरे एव स्वस्थस्य मनसः वासः इत्युक्तवान्

### संस्कृतविश्वविद्यालये अन्तरराष्ट्रीययोगदिवसस्य निमित्ते योगसहितं संगोष्ठी सम्पन्ना

दरभङ्गा। कर्णसिंहसंस्थानान्तर्गत संस्कृतविश्वविद्यालयस्य दरबारमण्डपे आज आयोजिता योगविषया संगोष्ठ्याः अध्यक्षतां वहन् कुलपतिः प्रो० लक्ष्मीनिवासपाण्डेय-महोदयः अवदत्–

'स्वस्थे शरीरे एव स्वस्थः मनसः वासः भवति।'

अस्मिन् अन्तरराष्ट्रीययोगदिवसस्य विशेषसन्दर्भे सः अवदत् यत् भारतीयज्ञानपरम्परायां योगस्य अत्यन्तं




महत्त्वं विद्यमानम् अस्ति। प्राचीनकाले योगः प्रतिदिनं व्यवहारिकजीवने समाहितः आसीत्, परन्तु कालान्तरात् सः जनजीवनात् लुप्तप्रायोऽभवत्।

इदानीं पुनरपि योगसाधनस्य लाभदायकत्वेन सर्वे जनाः लाभम् अनुभवन्ति। योगः शरीरे स्थैर्यं, सहिष्णुतां, धैर्यं, उच्चशक्तिं च वर्धयति। मानसिकपदे एकाग्रता, शान्तिः, सन्तोषः च वृद्धिं प्राप्नुवन्ति। एतेन आत्मबलेन सह आन्तरिकबाह्यसमंवयः अपि साध्यते।

कुलपतिना अपि उक्तं यत् योगः समत्वभावनां विकसितुं प्रेरयति। सः ज्ञानयोगं, कर्मयोगं, भक्तियोगं च विस्तरेण विवृणोत। पाश्चात्यदेशानां संदर्भे सः अवदत् यत् ते रोगाणां विस्तारं कुर्वन्ति, भारतदेशः तु योगमार्गं जीवनाय जगति प्रदर्शितवान् अस्ति।

एतेषु वक्तव्यानां परिप्रेक्ष्ये कुलसचिवः प्रो० ब्रजेशपतित्रिपाठी-महोदयः अपि योगमहत्त्वं प्रकाश्य सर्वेभ्यः योगासनेषु, क्रियासु च सहभागस्य आवाहनं कृतवान्। यम-नियमादीन् अपि सः विवृणोत्, विशेषतया सूर्यनमस्कारस्य लाभान् विशदं निरूपितवान्। पी.आर.ओ. श्रीनिशिकान्तेन उक्तकार्यक्रमवृत्तान्तः प्रदत्तः। संगोष्ठ्याः विषयप्रवर्तनं धर्मशास्त्रविभागाध्यक्षः प्रो० दिलीपकुमारझा-महोदयेन कृतम्। तेन योगं योगासनं च भारतीयसंस्कृतेः दर्शनस्य च अविभाज्यं अङ्गं इति प्रतिपादितम्। सः अन्तरराष्ट्रीययोगदिवसस्य अवसरं प्रति शुभाशंसनं अपि दत्तवान्। संगोष्ठी संचालनं डॉ० यदुवीरस्वरूपशास्त्रिणा सम्पन्नम्। स्वागतवाक्यं डॉ० नवीनकुमारझेन उद्घोषितम्। धन्यवादज्ञापनं राष्ट्रियसेवायोजनसंघटनस्य (छै) समन्वायकः डॉ० सुधीरकुमारझः समर्पितवान्। कार्यक्रमस्य प्रारम्भे योगप्रशिक्षकद्वयं श्रीशशिभूषणगुप्तः च श्रीशशिरञ्जनकुमारश्च समुपस्थितान् पदाधिकारिणः कर्मिणश्च नानाविधानि योगमुद्राणि अभ्यासार्थं प्रशिक्षणं दत्तवन्तौ।

---

प्रथमपुटस्य शेषभागः **सनातनशाश्वतसत्यस्य अवधारणा...**

स्वामी रामदेवः अपि उक्तवान् यत् – "देशे समृद्धिः स्वदेशी-आधारितजीवनवृत्तेः पालनतः सम्भवति। यत्र यत्र माननीयप्रधानमन्त्री गच्छति, तत्र तत्र ते योगं भारतीयसंस्कृतिं च प्रतिनिधित्वं कुर्वन्तीम् श्रीमद्भगवद्गीताम् अर्पयति। राष्ट्रपतिः, प्रधानमन्त्री, गृहमन्त्री, रक्षामन्त्री अपि सर्वे योगिनः एव सन्ति। अद्य समग्रं विश्वं योगाधारिता च जीवनपद्धतिं आत्मसात्कर्तुं सज्जं जातम्। अस्माकं पितामहानां महान् सांस्कृतिकनिक्षेपः केवलम् अध्यात्मपरो योग एव। योगस्य क्रियात्मकं स्वरूपं अष्टाङ्गयोगः, ध्यानयोगः, ज्ञानयोगः, भक्तियोगः, क्रियायोगः, हठयोगः इत्यादिनां सामूहिकव्यक्तित्वाभ्यासरूपं दृश्यते। योगाधारिता सनातनजीवनपद्धतिः वैज्ञानिकं सार्वभौमा च सिद्धान्तरूपिणी अध्यात्मनैतिकव्यवस्था अस्ति।"

एतेन सह हरियाणायाः मुख्यमन्त्री श्रीनायाबसिंहसैनी अपि उक्तवान् यत् हरियाणाराज्यं योगेन एव आरोग्यं स्वस्थं जीवनं च कर्तव्यमिति कृतसंकल्पम् पतञ्जलियोगपीठस्य अध्यक्षः आचार्यबालकृष्णः अपि अवदत् – "यदि प्रतिदिनम् अर्धघण्टापर्यन्तं योगाभ्यासः क्रियते, तर्हि जीवनं स्वस्थं सुखमयं च स्यात्। योगविषये बहवः शोधाः वैश्विकपृष्ठभूमौ प्रमाणीकृताः। योगविषये पतञ्जलिरिसर्च-फाउण्डेशनद्वारा शोधपत्राणि अपि प्रकाशितानि सन्ति।" अस्मिन् भव्ये कार्यक्रमे हरियाणाराज्यपालः बंगारूदत्तात्रेयः, मन्त्री आरतीरावः, सांसदः नवीनजिन्दलः, आयुष् विभागस्य महानिदेशकः संजीववर्मा, पतञ्जलिसंस्थानस्य साध्वी देवप्रिया, भ्राता राकेशः, योगायोगस्य अध्यक्षः भ्राता जयदीपः इत्यादयः अपि सम्मिलिताः।

चतुःशतग्रामाणां योगसाधकैः सह सम्यक् सम्पर्कः कृत्वा तेषां सहभागिता सुनिश्चितं कृतम्। कुरुक्षेत्रे ब्रह्मसरोवरस्य क्षेत्रे लक्षाधिकयोगसाधकानां सशरीरं सहभागिता जात, तथा सम्पूर्णहरियाणायाः सर्वेषु जनपदेषु तहसीलस्तरपर्यन्तं ११ लक्षाधिकजनाः ऑनलाइनरूपेण भागं स्वीकृतवन्तः।

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,Delhi-110053**
**IFC Code- IOBA0002249**

# बालभारतीपब्लिकविद्यालये अलंकरणसमारोहः आयोजितः

बालभारतीपब्लिकविद्यालये, एनटीपीसी–दर्लिपाल्यां दिनाङ्के २५ जून २०२५ तमे दिने २०२५–२०२६ तमे शैक्षणिकसत्रस्य निमित्तं अलंकरणसमारोहम् सम्यक् सम्पन्नः। अस्मिन् समारोहे विद्यालयस्य मुख्यकप्तानरूपेण नन्दिनीसिंह, उपकप्तानरूपेण ए.जे. अभिनया, एम् – एच.आ.र् एनटीपीसी–दर्लिपाली), संगीता बन्द्वासु (सहायकप्रबन्धिका, एनटीपीसी–दर्लिपाली) च उपस्थिताः आसन्। मुख्यातिथिना अन्यैश्च अतिथिभिः छात्रपरिषदः पदाधिकारीणां कृते ब्याजः (इंकहम) तथा पट्टिकाः (sashes) वितीर्यन्ते स्म। मुख्यातिथिना स्वप्रेरणादायकभाषणे छात्रपरिषदः




क्रीडकप्तानरूपेण निगमप्रधानः, अनुशासनकप्तानरूपेण ओजसकांबले, सांस्कृतिककप्तानरूपेण प्राचीचौधरी, साहित्यिककप्तानरूपेण आदित्यवैद्य च नियुक्ताः। एवं च विविधसदनानां कप्तानाः उपकप्तानाश्च अपि नियुक्ताः।

समारोहे मुख्यातिथिरूपेण श्रीरामभजनमालिकः (प्रकल्पप्रमुखः, एनटीपीसी–दर्लिपाली), अन्यातिथिरूपेण च श्रीमती सुवर्णाराय् (डी.जी. नवनिर्वाचितपदाधिकारीणां शुभकामनाः प्रदत्ताः, तेषां उज्ज्वलभविष्यस्य च अभिलाषा व्यक्ता। विद्यालयस्य माननीया प्रधानाचार्या श्रीमती नीरजातिवारी महोदया छात्रपरिषदः पदाधिकारीभ्यः विद्यालयस्य सिद्धान्तानाम् मूल्यस्य च शपथां दत्तवत्यः, तान् स्वकर्तव्येषु निष्ठया कार्यं कर्तुं, विद्यालयं च नवान्नतिशतं प्रति नेतुं प्रोत्साहनं च दत्तवत्यः।


**आदर्शयोजनाविभागः**

संस्कृतसंवर्धनयोजना

(भारतसर्वकारस्य शिक्षामन्त्रालयस्य केन्द्रीययोजनाः)

संचालकः

**केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली**

संसदः अधिनियमेन स्थापितः

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली – 110058

जालपृष्ठम् : www.sanskrit.nic.in

विज्ञापनसंख्या 01/2025 दिनाङ्कः 28.06.2025

**केन्द्रीययोजनानाम् अन्तर्गततया मान्यताप्राप्तेषु विविधेषु आदर्शसंस्कृतमहाविद्यालयेषु (ASMs) प्राचार्यपदस्य नियुक्त्यर्थम् अधिसूचना**

संस्कृतसंवर्धनार्थं भारतसर्वकारस्य शिक्षामन्त्रालयेन प्रवर्तमानानां केन्द्रीययोजनानां क्रियान्वयनार्थं केन्द्रीयसंस्कृतविश्वविद्यालयः केन्द्रक-अभिकरण (नोडल एजन्सि)-रूपेण कार्यं करोति। तासु योजनासु "मान्यताप्राप्तानाम् आदर्शसंस्कृतमहाविद्यालयानाम् (ASMs)/आदर्शसंस्कृतशोधसंस्थानानाम् (ASSSs) कृते वित्तीयसहायतायोजना (संशोधिता आदर्शयोजना – २०२२)" इत्यनया योजनया राष्ट्रस्य विभिन्नराज्येषु स्थितानां ASMs/ASSSs संस्थानानां कृते वित्तीयसाहाय्यं प्रदीयते। अस्याः योजनायाः अन्तर्गततया आदर्शसंस्कृतमहाविद्यालयत्वेन (ASMs) मान्यताप्राप्तेषु महाविद्यालयेषु अधोलिखितपदानां नियुक्त्यर्थं भारतीयनागरिकेभ्यः सद्यस्क-माध्यमेन (Online) आवेदनं केन्द्रीयसंस्कृतविश्वविद्यालयेन आमन्त्र्यते ।

- पदस्य नाम – प्राचार्यः (आचार्य-वेतनश्रेणी)
- नियुक्तेः प्रकारः – साक्षात् नियुक्तिः
- कार्यकालः – यू.जी.सी.-मानदण्डानुसारं पञ्चवर्षीयः कार्यकालः
- स्तरः वेतनमानं च – सप्तम-केन्द्रीयवेतन-आयोगानुसारम्, शैक्षणिकस्तरः – 14 (वेतनमानम् – ₹ 1,44,200 – ₹ 2,18,200)
- पदानां संख्या – त्रयोदश (13)
- सद्यस्क-माध्यमेन पञ्जीकरणस्य/आवेदनस्य प्रारम्भदिनाङ्कः – 28.06.2025 (शनिवासरः)
- सद्यस्क-माध्यमेन पञ्जीकरणस्य/आवेदनस्य अन्तिमदिनाङ्कः – 28.07.2025 (सोमवासरः), सायं 06:00 पर्यन्तम्।

➢ आवेदनप्रक्रिया, सद्यस्क-माध्यमेन (Online) आवेदनपत्रस्य प्राप्तिसूत्रम् (Link), अपेक्षिताः अर्हताः, अनुभवः, सामान्यनियमाः उपबन्धाश्च, आवेदनाय निर्धारितशुल्कम्, हार्ड्कॉपी-प्रेषणम्, विस्तृतविज्ञप्तिः इत्यादीनां सूचनानां कृते केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालपृष्ठे www.sanskrit.nic.in इत्यत्र "Recruitment Tab" अवलोकनीयम् ।

हस्ता/-

कुलसचिवः (प्र०)


## 'बालविश्वम्' काव्यसंग्रहाय देहली- साहित्य-अकादम्याः बालसाहित्य-पुरस्कारः प्रीतिपुजारायै प्रदत्तः

(वार्ताहरः वत्सदेशराजशर्मा)



देहलीसाहित्य–अकादमी द्वारा २०२५ तमे वर्षे प्रदत्ते बालसाहित्य–पुरस्कारे, संस्कृतभाषायां श्रीमतीप्रीति- पुजारायाः 'बालविश्वम् इत्यस्य काव्यसङ्ग्रहस्य चयनमभवत् । "बालविश्वम्" डॉ. प्रीतिः पुजारामहोदयाया बालानां कृते विरचितो आधुनिकसंस्कृत–लघुकाव्यसङ्ग्रहः वर्तते । अयं काव्यसङ्ग्रहो न केवलं बालकानामपितु शिक्षकानां, संस्कृतरसिकानां कृते महदुपकारकोस्ति । कृतिरेषा बालकानां कृते संस्कृतभाषायां लिखिता सुन्दरी रचना अस्ति, या ज्ञान एवं मनोरञ्जनस्य सुन्दरं समन्वयं दर्शयति।

प्रीति–पुजारया पुस्तकेऽस्मिन् सरलशब्दावली,गीतपद्धतिः तथा शिक्षायाः विविधविषयेषु सन्देशस्य समुचितं सञ्चारणं च सम्यक् प्रकारेण साधितमस्ति ।

बालजगतः विविघानि कौतुकानि अत्र गीतमाध्यमेन वर्णितानि । चन्द्रः, मोटरयानम्, शाला, वर्षागीतम्, स्वापगीतम्, मेघराजा, वायुयानम्, रोमशी, वानरभ्राता, जनकः, जननी, मोबाइलयन्त्रम्. रविवासरः, चटका, रेलयानम्, पञ्चाली, मातुलगेहम्, मोदकम्, नौका, वसन्तगीतम्, पुष्पपतङ्गः, तारकाणि इत्यादयान् नैकान् विषयान् आधृत्य नवीनानि बालगीतानि कविना विरचितानि । अस्य बालगीतसंग्रहस्य विशेषता वर्तते यत् प्रत्येकं गीतं मधुरेण लयेन गातुं शक्यते । प्रत्येकं गीतस्य विलक्षणो लयो वर्तते। गीतपद्धत्या सुरभारतीकवितासर्जनं सर्वदैव सहृदयानां हृदयमाकर्षति।

बालविश्वमिदं बालमानसे जनितानि नवीनानि कौतुकानि एवं बालसहजभावान् उद्घाटयति। बालभावानुगामिनी सरसगीतपद्धतिरवश्यमेव बालमानसं नन्दिष्यति । सरलतां एवं भावप्रवणतां संरक्षितुं संग्रहेऽस्मिन् विनम्रः प्रयासः कविना कृतः

इयं कृतिराधुनिकसंस्कृतबालसाहित्यसरितोऽमूल्या गुणनिकाऽस्ति। बालकानां, पाठकानां, शोधकर्तणां, नवोदितकवीनां कृते इयं कृतिरतिमहत्त्वपूर्णा, सार्थिका च अस्ति।

एषा रचना संस्कृतसाहित्ये बालसाहित्यस्य पुनरुत्थाने विशेषं योगदानं दत्वा सुरभारत्याः संरक्षणं करिष्यति ।

एषः पुरस्कारः प्रीतिपुजारायै प्रमाणपत्रेण सह पञ्चदशसहस्ररूप्यकाणां (रुपये ५०,०००) धनराशिं दत्वा विशेष–समारोहे अकादमी द्वारा प्रदास्यते।

प्रथमपुटस्य शेषभागः **'अनन्तश्रीविभूषित–जगद्गुरोः...**

भाषमाणः उक्तवान् – 'स्वामिकरपात्रिमहाभागः अधर्मपूर्णे लोके धर्मस्य साक्षात्प्रतिमूर्तिः आसन्।

तेषां वचनानि ऋषिप्रतिमानि, अमोघानि च। तेषां आशीर्वादः खलु कलिकाले मानवस्य उद्धाराय साधनं भवति। एतेषां तपोभूमौ यमुनाघाटस्य नामकरणं तेषां नाम्नि भवेत्। वयं सर्वेऽपि एतत्कर्म समर्पितभावेन साधयिष्यामः। अतिथिरूपेण श्रीशिवरामपाण्डेयः (अधिवक्ता:, उच्चतमन्यायालयः) अवदत्–'स्वामिकरपात्रिमहाराज इत्येवं महाविभूतयः अस्माकं संस्कृतिकधरोहरः। तेषां सिद्धान्ताः अस्माकं मार्गदर्शकत्वेन वर्तमानाः।' वरिष्ठपत्रकारः श्रीमधुकरमिश्रः–'एतेषां कार्याणां प्रसाराय सर्वेषां मीडियाप्रकाराणां उपयोजनं आवश्यकम्।' संस्कृतस्य वरिष्ठपत्रकारः श्रीवेदप्रकाशशर्मा अपि प्रचारप्रसारणस्य महत्त्वं विशदं कृतवान्।

गोष्ठ्याः अध्यक्षः अनन्तश्रीविभूषित–जगद्गुरुः श्रीदेवादित्यानन्दसरस्वतीमहाराजः स्वस्य आशीर्वचने अवोचत्– 'हिन्दुराष्ट्रस्य मार्गे प्रमुखं विघ्नं हिन्दुधर्मावलम्बिनां धर्मविमुखता च प्रमादः च। गौः, ब्राह्मणः, शास्त्राणि–एषां त्रयाणां विशेषमहत्त्वं सदा स्वीकर्तव्यम्। स्वामीकरपात्रीमहाराजस्य गौरक्षायाः आन्दोलनम् अभूतपूर्वम् आसीत्–यत् भारतसर्वकारं गौरक्षायाः विषये विचाराय विवशं कृतवती। जीवनस्य मूलं धर्मः, धर्मस्यानुकूलं सम्पत्ति अर्जनं च एव। अस्माकं आध्यात्मिकसंविधानम् 'वेदः' एव यतः वयं संचालिताः। संरक्षकः प्रोफेसर–देवेन्द्रमिश्रोऽपि स्वकार्यार्थं स्वामिकरपात्रिमहाराजस्य राष्ट्रऋषित्वं उद्घोष्य आशीर्वचनं दत्तवान् यन्नैतिक–धार्मिकजीवनस्य आधारः सत्यं धर्मः दया च। स्वामीकरपात्रीमहाभागः यतिचक्रचूडामणिः, गो–ब्राह्मण–शास्त्ररक्षणे समर्पितजीवनः। ते स्मरणीयाः–आध्यात्मिकदृष्ट्या यदा वयं तान् स्मरामः, तदा वयं तान् निकटस्थं अनुभवामः। ते अभिनवशङ्करः आसन्, अधर्माग्निना संतप्तायां पृथिव्यां तारकः ऋषिः। एषः पुण्यक्षेत्रस्य सौभाग्यम्–यत् स्वामिनः नाम्नि एषः घाटः नामं लप्स्यते। सङ्गोष्ठीसञ्चालनकार्यं डॉ. अतुलकुमारशुक्लः (सहायकराज्यप्राध्यापकः, बापूपीजीमहाविद्यालयः, गोरखपुरं) कृतवान्। कार्यक्रमे प्रमुखतया श्रीसुभाषोज्हा (भा.ज.पा.–प्रतापगढस्य सांस्कृतिकप्रकोष्ठाध्यक्षः, श्रीअनुभवमिश्रः, आमोदमिश्रः, आचार्यमधुसूदनः, श्रीविवेकद्विवेदीः, आचार्यगऊदासः, श्रीरविन्द्रः, श्रीवीरेशः, श्रीपियूषअगरियः च अपि उपस्थिताः आसन्। एवमेव संन्यासिनः, महामण्डलेश्वराः, महात्मानः, समाजसेविनः, आचार्यब्रह्मचारिणः, धर्मप्रेमिणः गृहस्थजनाः च विशदं सान्निध्यम् अददत । अन्ते वैदिकमन्त्रघोषेण गोष्ठ्याः समापनम् अभवत्।

# सम्पादकीयम्

सम्मानिता: सुजना:! सादरं नमोनम:।

प्रतिवर्षं जूनमासस्य एकविंशे दिनाङ्के आचर्यते अन्ताराष्ट्रिययोगदिवस: केवलं भारतस्य गौरवगाथाम् एव न, अपितु समग्रमानवजाते: स्वास्थ्यदृष्ट्या महत्त्वपूर्णं सन्देशं वहति। योगस्य प्रभाव: अद्य सीमितो नास्तिख्रस: सीमां उल्लङ्घ्य, देशकालयो: बन्धनं विहाय, विश्वमञ्चे प्रतिष्ठित: अस्ति। एष: योग:, य: भारतस्य सहस्राब्दपरम्पराया: वैज्ञानिकाधिष्ठित: आन्तरिकानुभवसिद्ध: च साधनमार्ग: अस्ति, अद्य वैश्विकस्वीकृतिं प्राप्तवान्।

योगस्य मूलं 'युज्' इत्यस्मात् धातो: निष्पन्नंख्रयोजनं, मेलनं, समन्वय: च तस्यार्था:। एषा योजना केवलं शरीरस्य चित्तस्य एव न, अपितु आत्मन: परमात्मना सह एकत्वस्य अनुभूतिरपि विद्यते। योग: एतेषु सर्वेषु स्तरेषु समत्वं, सन्तुलनं, स्थैर्यं च स्थापयति। अस्य अभ्यास: न केवलं कश्चन व्यायाम: अथ च शारीरिकमुद्राणाम् अनुकरणं, अपि तु चिन्तनस्य, दृष्टिकोणस्य च आन्तरिकपरिवर्तनं जनयति।

भारतस्य ऐतिहासिकदृष्ट्या मुनिना पतञ्जलिना निरूपित: अष्टाङ्गयोग:, श्रीकृष्णेन प्रदत्त: कर्म-ज्ञान-भक्तियोग:, स्वामिविवेकानन्देन विश्वमञ्चे उद्घोषितं योगदर्शनम्-एते सर्वे दर्शयन्ति यत् योग: केवलं क्रियात्मकं वा साधनं न, अपितु जीवनस्य एक: सम्पूर्ण: दृष्टिकोण: अस्ति।

प्रधानमन्त्रिणा नरेन्द्रमोदिना २०१४ तमे वर्षे संयुक्तराष्ट्रमहासभायां योगदिवसस्य प्रस्ताव: प्रस्तुत:, येन केवलं त्रयाणां मासानाम् मध्ये १७७ राष्ट्राणाम् अभूतपूर्वं समर्थनं प्राप्तम्। २०१५ तमे वर्षे प्रथमयोगदिवस: जगति आचरित:ख्रदिल्लीनगरे राजपथे ३५,००० जनानां सहभाग:, प्रधानमन्त्रिणा सह योगाभ्यास: च अभूतपूर्वं उदाहरणम् अभवत्। एषा घटना केवलं संख्यया महती न, अपि तु विश्वजनमनसि भारतीययोगदानस्य पुन: प्रतिष्ठाया: प्रतीकम् अपि।

आधुनिकजीवनस्य तीव्रस्पर्धायां, त्वरितगतिकायां, तथा च मानसिकव्याकूल्यस्य युगे-योग: एका सौम्या, गम्भीरा च प्रेरणा। कोरोना-महामारीकाले, यदा मानवता भयेन, मानसिकतत्सङ्गेन च पीडिता आसीत्, तदा योगस्य सामर्थ्यं प्रत्यक्षतया अनुभूतं रोगप्रतिरोधकशक्ते: वृद्धि:, मानसिकस्थैर्यस्य संवर्धनं, आत्मविश्वासस्य पुन:स्थापनम् च।

अद्य विश्वस्य प्रतिष्ठितानि चिकित्सा-अनुसन्धानसंस्थानानि-एमस्, हार्वड्र्, स्टैनफोर्ड्च योगं वैज्ञानिकपद्धत्या सह अंगीकृत्य तस्य प्रभावकारितां प्रमाणयन्ति। एतेषां अध्ययनानां निष्कर्ष: एष: यत् योग: न केवलं रोगहरणाय, अपितु दीर्घकालीनस्वस्थजीवनस्य पथदर्शक: अपि।

विशेषत: युववर्गो, य: अद्य सामाजिकभारेण, तकनीकीयविस्मयेन च आक्रान्त: दृश्यते-योग: तस्य चित्ते धैर्यं, संकल्पबलं, आत्मनियन्त्रणं च स्थापयति। विद्यालयेषु महाविद्यालयेषु च योगशिक्षाया: समावेशो यदि नियततया क्रीयते, तर्हि भाविन: नागरिका: न केवलं बुद्धिमन्त:, अपि तु संवेदनशीला:, चरित्रवन्त: च भविष्यन्ति। योगशिक्षा अनुशासनाय, एकाग्रताय, मानसिकसंतुलनाय च अनिवार्या अभवत्।

एष: योगदिवस:, य: प्रतिवर्षं दृश्यते, केवलम् उत्सवस्वरूपेण न द्रष्टव्य:। अपितु आत्मनिरीक्षणस्य कश्चन अवसर:ख्रकिं वयं आत्मन: संवर्धनाय, शारीरिक-मानसिकस्वास्थ्याय, समाजिकसामञ्जस्याय च प्रयत्नशीला: स्म: वा? किं योगं न केवलं एकवारं, अपितु नित्यं जीवनचर्याया: भागं कुर्म:?

अत:, अस्मिन् दिवससन्दर्भे सर्वे वयं संकल्पं कुर्याम-योगं केवलं प्रदर्शनं न कुर्म:, अपि तु तं जीवने स्थापयित्वा आत्मकल्याणम् आरभ्य सामाजिक-वैश्विकशान्तिपर्यन्तं तस्य प्रभावं विस्तारयेम।

योग: एव परं साधनं यत् व्यक्तिम् आरभ्य विश्वं यावत्-स्वस्थं, संतुलितं, च शान्तिपूर्णं सर्वं कर्तुं शक्नोति। योगत: एव कल्याणं व्यक्ते: समाजस्य जगतश्चापि विद्यते।

भवदीया-**सम्पादिका**

# 'तत्त्वमसीतिमहावाक्यार्थविचार:'

**( इति पूर्वप्रकाशितस्य निबन्धस्यावशिष्टांश: )**

**-डॉ. रामप्रियशर्मा:**
**पटना**

जाग्रत्स्वप्नगतौपाधिकजीवरूपाद्विलक्षणं सुषुप्तौ जीवत्वविनिर्मुक्तमनौपाधिकं विशुद्धात्मस्वरूपं दर्शयितुकाम: ऋषिरुद्दालक: स्वपुत्राय श्वेतकेतवे निगदति -स्वप्नान्तं मे सोम्य विजानीहि यत्रैतत् पुरुष: स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवंतीति (छा०६.८.१)

स्वप्नान्त इत्यत्र बहुब्रीहिसमासोऽवगन्तव्य:। सर्वस्य स्वप्नस्यान्तो भवति यस्मिन् स्थले तत् स्वप्नान्तमिति कथ्यते ऽत: स्वप्नान्तशब्देन सुषुप्तिर्बोध्यते सर्वेषां स्वप्नानां तत्रैवान्तर्हितत्वात्।

सुषुप्तिलक्षणस्य निर्वृतिधाम्नो नितरामद्भुतं वैशिष्ट्यं वर्तते यदुपनिषत्सु तदाधृतभाष्यग्रन्थेषु यथाप्रसङ्गं वर्णितं भवति।

यत्रैतत्पुरुष: स्वपिति

पुरुषोऽयं कस्यामवस्थायां शेते? सुषुप्त्यवस्थायाम् ।

सुषुप्तौ कुत्र? हृदयान्तर्गते हृदयमध्ये य आकाशो विद्यते तस्मिञ्छेत इति बृहदारण्यकश्रुतिरुत्तरयति।

अत्राकाशशब्देन किं तात्पर्यम्?आकाशशब्दो लोके रूढितो भूताकाश एव निरूढतम: किन्तु कतिपयेषु श्रुतिवाक्येषु आकाशपदेन ब्रह्मणो ग्रहणं क्रियते यद्यपि मीमांसकैरेवं नाभ्युपगम्यते यतस्तन्मतानुगुणं वेदे प्रयुक्तेनाकाशशब्देन भूताकाश एव बोध्यते।लोकावगमसामर्थ्य: शब्दो वेदेऽपि बोधक: इत्युक्तं भवति ब्रह्मसिद्धौ, किन्तु ब्रह्मसूत्रकारेणैतन्मतं व्युदस्यते 'आकाशस्तल्लिङ्गात्ऽइति सूत्रनिरूपणप्रसङ्गे (आकाशाधिकरणान्तर्गते,ब्र.सू.शा.भा.१.१.२२)

छान्दोग्योपनिषदो मन्त्रोऽयं स्वमतसिद्ध्यर्थं प्रस्तूयते-

'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाश: परायणम्

(छा.उप.१/९/१)"

अत्र 'सर्वस्य लोकस्य का गति?' इति प्रश्नोत्तरशैल्या प्रथमं प्रश्नमुपस्थाय 'आकाश:' इत्युत्तरितंभवति।

कोऽयमाकाश:? आकाशो सर्वभूतोत्पादक:सकललयहेतु:सर्वतो ज्यायान् परममयनञ्च(सर्वाश्रयश्च इति)सवैशद्यं निरूपितं भवतिअत्र सर्वभूताश्रयत्वसर्वभूतोत्पादकत्व-सर्वज्यायस्त्वाद्यसाथारणधर्महेतो: (एकार्थभूतलिङ्गात्) आकाशपदेन ब्रह्मैव तात्पर्यत्वेनावधार्यते।

न हि भूताकाश एतादृश: साधारणधर्मवान् भवितुमर्हति।

य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते

(बृह.उप.अध्याय २, ब्राह्मण१,मन्त्र १७

पूर्ववदत्रापि आकाशब्देन ब्रह्म (परम आत्मा)इत्यर्थो बोध्यते न त्वाकाशो भौतिक:। भाष्यकार: कथयति-'य एषोऽन्तर्मध्ये हृदये हृदयस्याकाश:,य आकाशशब्देन पर एव स्वात्मा उच्यते, तस्मिन् स्वे आत्मन्याकाशे शेते स्वाभाविकेऽसाधारणे' (तत्रैव २.१.१७) यदा पुरुष: (औपाधिक आत्मा-जीव:)स्वप्तुं गच्छन्ति हृदयाकाशं तदानीं(सुषुप्तौ)उपरमन्ते मन: करणबुद्धिचित्ताहङ्कार-चिदाभासादय:।मन:करणादिषूपरतेषु सन्त्यक्तजीवभाव: पुरुष: (अनौपाधिकस्सन्) शुद्धेऽविशेषे स्वाभाविके स्वात्मरूपभूते परमात्मन्येव प्रतिष्ठितो भवति तस्मिन् काले पुरुषोऽयं स्वस्वरूपमधिगच्छति।स्वं अर्थात् स्वस्वरूपम(आत्मतत्त्वम्) अपीति प्राप्नोति। तस्मात् ष्स्वपितिष्इत्येवं कथ्यते।

सुषुप्तिं विहाय अन्यस्यां कस्यामपि दशायामौपाधिकोऽयमात्मा(पुरुष:)लब्धस्वरूपो न भवतीत्युदीरयन्ति वेदविद:(छा.उप.६/८/१.शाङ्करभाष्यम्)।

यदा पुरुष: जागरितावस्थायां भवति तर्ह्यसौ देहाध्यासाद् विस्मृतात्मस्वरूपो भूत्वाऽस्मद्युष्मत्प्रत्ययनिष्ठत्वं व्रजति-'सुख्यहम्','दु:ख्यहम्', 'अहममुष्य पुत्र:', 'कृशोऽहम्', 'ममात्मजोऽयम्','निर्धनोऽहम्','बलवत्तमोऽहं सर्वेषाम्'. 'ब्राह्मणोऽहम्','कृष्णोऽहम्', "वेतस्त्वम्", "एते मामका एते तावकाश्चेषति विविधप्रयोगदर्शनात् । एतै: प्रयोगैरविद्याप्रसूतदेहाध्यास-पुरस्सरभेदविद्वेषबुद्धिस्संसूच्यते या निखिलविवादप्रसवित्री वर्तते।भेदविद्वेषादिबुद्ध्या प्रवर्तिता जना: परस्परं क्षुद्रविषयानाधारीकृत्य विवदन्ते सम्मान्यान् न सम्मानयन्ति पितरौ समुपेक्षन्तेऽहमेव कर्ता भोक्ता चेति मत्वा दर्पोद्धता विखण्डितसकलमर्यादास्ते स्वैरिणो भवन्ति।किम्बहुना,जातिधर्मदेशसम्प्रदायादिभेदविद्वेषबुद्धिं समाश्रित्य मिथो हिंसाग्निप्रज्वालनेन समाजधर्मराजनीतिपरिसरेष्वराजकत्वलक्षण-

विकृत्युद्भावनेना- न्ताराष्ट्रियपरिदृश्ये दुर्दान्तातङ्कवादिभिरसङ्ख्य-बालवृद्धनरयोषिन्निषूदनेन विवेकान्धराष्ट्रैस्सत्तोन्मादवशात् यदा कदा [साम्प्रतमपि]प्रवर्तितेष्वन्तरिक्षयुद्धेषु भीषणजनसंहारद्वारा दानवतानग्ननृत्योपस्थापनेन च करुणतमानि दृश्यान्यवतार्यन्त इति न पाणिपिहितं प्रेक्षावताम्।

अहो कीदृशीयं सर्वानर्थहेतुभूताऽविद्या या नैजोपाधिपाशैर्बद्ध्वा निखिलजीवांस्तन्मूलस्वरूपादपसार्य विविधकर्मविकर्मसु विनियोज्य महाविनाशं प्रति गमयति वस्तुतस्तु जीवमूलस्वरूपं सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दस्वरूपमेव भवति यदवाप्यते शाश्वतं[नित्यश: ] आत्मसाक्षात्कारदशायां यत्र कृतात्मसाक्षात्कार: पुरुष: परमानन्दसागरेऽवगाहते सुषुप्तौ च सता सम्पद्य लब्धानन्दस्वरूपो भवति [यद्यपि सुषुप्तौ बीजभूतकारणशरीरोपाधिना सहात्मा स्वसत्स्वरूपं प्रविशति।]

आयाति जाग्रत्सुषुप्त्योर्मध्ये स्वप्नावस्था।बृहदारण्यक-श्रुत्यनुगुणमिहलोकपरलोकयोस्सन्धौ या तृतीया ऽवस्था विद्यते सा सन्धिस्थले वर्तमानत्वात् स्वप्नावस्था सन्ध्याख्येत्युच्यते (४.३.९)अत्रेहलोकपरलोकशब्दयोर्यथासङ्ख्येन

जाग्रत्सुषुतिकालद्वयमभिप्रेतं भवति ।कथं परलोकशब्देनात्र सुषुप्तिर्व्यज्यते?

अस्मिन्विषयेऽनुभव एव प्रमाणम् यतोहि जाग्रत्सुषुप्त्योस्सन्धौ लोके स्वप्नावस्थाधिगमस्सन्दृश्यते। द्वितीयत: शाङ्करभाष्येऽभिहितम्-'परलोक एव स्थानं परलोकस्थानम्-तच्च शरीरादिवियोगोत्तरकालानुभाव्यम् 'इति (बृहदारण्यकोपनिषद्,४.३.९ ,पृ.९२२)। सुषुप्तौ शरीरादिभावनिवृत्तिपूर्विका पुरुषस्य सत्स्वरूपावाप्तिरभ्युपगम्यते ऽत: परलोकशब्दोऽत्र सुषुप्त्यर्थे प्रयुज्यत इत्येवं प्रतिभाति।

इन्द्रियेषूपरतेषु नानाविधा: स्वप्ना आविर्भवन्ति तत्र विज्ञानमयादिकोशत्रयात्मकं(सप्तदशावयवि)सूक्ष्मशरीरं (नामान्तरं लिङ्गशरीरम्)विद्यमानं (सक्रियञ्च)भवति।तत्राचेतनमनसोद्भाविता बहवस्स्वप्नाश्चलचित्रवद्दृश्यन्ते।प्रायशस्स्वप्ना अस्तव्यस्ता अस्पष्टाश्च भवन्ति किन्तु केचन स्वप्नास्सुस्पष्टतो भाविशुभाशुभवृत्तानि संसूचयन्ति,ये जाग्रत्काले सत्यत्वेन प्रमाणिता: भवन्ति,यथा दृष्टस्वप्न: कश्चित् विद्वत्पुरुषोऽवलोकयति यदुज्जयिन्यामायोजितायामेकस्यां साहित्यगोष्ठ्यामसौ स्वविशिष्टावदानाय साहित्यवाचस्पतीत्युपाधिना पुरस्क्रियते तर्ह्यसावत्यर्थं प्रसादमनुभवति तदनन्तरं कालक्रमेण दृष्टस्वप्नस्सत्यतां यातीव दृश्यते।एवम्प्रकारेण यदि कश्चिन्मनुष्य: स्वप्ने 'भविष्यति कालेऽसौ प्रभूतं धनं लप्स्यते' इति केनापि पुरुषेण संसूच्यते तर्ह्यसौ नितरां प्रसीदति किन्त्वेतद्विपरीतं स्वप्ने स्वकीयस्य प्रियजनस्य निधनवृत्तं स्वधननाशवृत्तं वा संसूच्यते चेद्विषण्णो भवति ।

भगवन्तो भाष्यकारा:स्वाप्नदर्शनं पुण्याघकार्यभूतं सुखदु:खसंयुक्तं मन्यन्ते यत: पुण्यपापे क्रमश: सुखदु:खारम्भके भवत:। पुण्यपापयोर्यत् सुखं दु:खं तद्दर्शनलक्षणकार्यञ्च वर्तते तदविद्याकामनाऽऽश्रयेण संभवति तस्मात्स्वप्ना: संसारहेतुभिरविद्याकामनाकर्मभिस्संयुक्ता भवन्ति [छा. ६/८/१,शाङ्करभाष्यम् ] इदमेव कारणं यज्जीवस्स्वप्नावस्थायां स्वस्वरूपं न प्राप्नोति। वस्तुतस्तु जीवस्य स्वस्वरूपस्यावाप्तिर्भवति सुषुप्तौ यत्रासौ पापपुण्याभ्यामसम्बद्धस्तीर्णसर्वहृच्छोक: परमानन्दरूपश्च वर्तते -'अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवती' ति (बृ.उ.,४.३.२२;४.३.३३)इत्यादिना।

सुषुप्तिरात्मनो(जीवस्य)विश्रान्तिधामत्वेनाभ्युपगता भवति जाग्रदवस्थायां विविधश्रमजक्लान्त्यपनोदनाय जीवो विश्रान्तिं लब्धुकामो वर्तते किन्तु स्वरूपावस्थानमन्तरेण न कुत्रापि क्लान्त्यपनुत्तिर्भवितुमर्हति अतस्सुषुप्तिदेव्या निर्वृतिदं क्रोडमसौ समाश्रयत एतद्विशदविवेचनप्रयोजना बृहदारण्यकश्रुति:श्येनदृष्टान्तं प्रस्तौति-

'तद् यथाऽस्मिन्नाकाशे' येनो वा सुपर्णो वा विपरिपत्य श्रान्त: संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति'(बृ.उप. ,४.३.१९)।।

यथाऽस्मिन्नाकाशे भौतिके श्येन:(शशादन:,) सुपर्णो(क्षिप्र: श्येनो)वा विपरिपत्य प्रसार्य स्वपक्षद्वयं भूयोभूय उड्डयनकर्मणा श्रान्तस्सन् स्वसंलये (स्वनीडे)सम्यग्तया लीयते [स्वीयात्मानं लभते)तथैव पुरुषोऽयं[स्वश्रमापनोदाय] एतस्मा-एतस्मै स्थानाय (तत्स्थानं प्रति]धावति[स्वनीडं -स्वनिर्वृतिधाम प्रविशति]यत्र सुप्त: (सुषुप्तौ लब्ध सम्प्रसाद: पुरुष:)सर्वभोगाभिलाषस्वप्नदर्शनादिव्यापारविनिर्मुक्तो भवति यत: (श्रीमद्भगवद्भाष्यकारानुगुणं )'असौ सर्वसंसारधर्मविलक्षणं सर्वक्रियाकारकफलायासशून्यं स्वमात्मानं प्रविशति'(बृ.उ.४.३.१९,शां.भा.)।

उपर्युक्तेऽर्थे शकुनिदृष्टान्तोऽयं प्रस्तूयते शिष्यं श्वेतकेतुं प्रति महर्षिणोद्दालकेन यश्छान्दोग्यश्रुतेर्मन्त्रेऽस्मिन् वर्ण्यते -

'स: यथा शकुनि: सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मयो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वौ प्राणमेवोपश्रयते ।' (छा.उ.,६.८.२)

[पोते]सूत्रेण प्रबद्ध:कश्चिच्छकुनि:(पक्षी) सर्वासु दिक्षु परिपत्य(स्वीयोड्डयनकर्मणा)श्रान्तस्सन् विश्रामाय कमप्याश्रयमन्वेष्टुं प्रयतते किन्तु कुत्रापि आश्रयं न लभते वृक्षभवनाद्यवस्थानाभावात्। अतस्सर्वतो विवशीभूय स्वबन्धनस्थानमेवाश्रयत इत्थमेव तन्मन:(असौ मन:संज्ञकोपाधिर्जीव:) दिशं दिशं पतित्वा -गत्वा अन्यत्र किमप्यवस्थानं

शेषभाग:पंचमपुटे

चतुर्थपुटस्य शेषभागः

# ‘तत्त्वमसीतिमहावाक्यार्थविचारः’

न लब्ध्वा प्राणमेव समाश्रयते।

दिशं दिशमर्थात् सर्वासु दिक्षु। एताः का दिशः? एतास्सुखदुःखलक्षणा दिशो वर्तन्ते यासु (सुखदुःखादिरूपासु दिक्षु)परिभ्रमणकर्म निर्वर्तयन्नसौ श्रान्तो भवति जाग्रत्स्वप्नावस्थयोः।

अत्र प्राणशब्देन सत्स्वरूप आत्मा बोध्यते ‘प्राणस्य प्राणः(केन उ. १.२)ष ,ष्प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः।ते निश्चिक्युस्तद्ब्रह्म पुराणमग्र्यम्’ (बृ.उ.४.४.१८)इत्यादिना। अतो भाष्यकारानुगुणं प्राणोपलक्षितस्सत्संज्ञकः परदेव एवात्र प्राणशब्देनावधार्यत इति निश्चप्रचम्।

किं सुषुप्तिस्थात्मा (पुरुषः) पूर्णतो विशुद्धानन्दस्वरूपो भवति? इति जिज्ञासायां सत्यामुदीरयितुं शक्यते यन्नैतत्समीचीनमेतादृशं कथनमद्यावधि संसारसृष्टिबीजेन (अज्ञानलक्षणकारणशरीरेण) तस्यात्मनस्सम्बद्धत्वातृ। यद्येवं नाभविष्यत् तर्ह्यसौ तत्क्षण एव जन्ममरणादिसंसृतिचक्राद्विमुक्तोऽभविष्यत् जगत्यस्मिन् पुनस्तत्प्रत्यावर्तनं नाभविष्यच्चेति।

शाङ्करभाष्येऽनेकत्र प्रायशः सुषुप्तिदृष्टान्तेन मुक्तात्मनस्स्वरूपस्य च कश्चिदाभासो लभ्यते येन केचन जना भ्रमापन्ना भवन्ति यत् सुषुप्तिस्थितस्य मुक्तपुरुषस्य च स्थितिस्समानैव भवति किन्तु एतदवधारणं भ्रान्तिमूलकं वर्तते यतो मुक्तपुरुषः सर्वावस्थाभिस्सर्वशरीरैश्च शश्वत् सम्बन्धविनिर्मुक्तो भवति तस्य सर्वमायिकबन्धनानामत्यन्ताभावो वर्तते च यद्यपि लोकदृष्ट्या तच्छारीरिकव्यवहारप्रतीतिस्यात् तथापि मुक्तपुरुषस्ततो निर्लिप्तो भवत्येव किन्तु सुषुप्त्यवस्था स्वयं बन्धनमात्रं वर्तते ऽतः सुषुप्तपुरुषस्य मुक्तात्मना सह किमपि वास्तविकं साम्यं नास्ति। यद्येवं तर्हि किन्निमित्तमेतत् कथ्यते यत् सुषुतौ पुरुषः सता [स्वस्वरूपेण] सम्पद्यते? दृष्टान्तस्त्वनेन हेतुना प्रस्तूयते यत् यथा मुक्तात्मा सर्वविधहर्षशोकादिविकारैस्सदा सम्बन्धविरहितो भवति तथैव सुषुप्तजीवोऽपि किञ्चित्कालं द्वैताभावाद्धर्षशोकादिविकारमुक्तो वर्तते यतस्तदानीमसौ (सुषुप्तिकाले)अव्याकृताया मायाया अंशभूतेन कारणशरीरेण सहैव ब्रह्मण्यवस्थितो वर्ततेऽतो हेतुना ऽनेन एतद्विषयेऽसौ न किञ्चिदवगच्छति [बृ.उ.४.३.१५ इत्यस्य मन्त्रस्य शाङ्करभाष्यान्तर्गते पादटिप्पणी द्रष्टव्या,पृ.९४३]।

कार्यकारणपरम्परयाऽपि जगन्मूलतत्त्वनिरूपणम्

स्वपितिनामद्वारा जगन्मूलजीवसत्स्वरूपं बोधयित्वा ऽन्नादिकार्यकारणपरम्परयाऽपि जगन्मूलं दर्शयितुकामो महर्षिरुद्दालको निगदति स्वपुत्राय श्वेतकेतवे - ‘अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायो ऽश्वनायःपुरुषनाय इत्येवं तदप आचक्षते ऽशनायेति तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति’ [छा.उ.६.८.३]

अत्रोपनिषदा महासन्देशनिरूपणपरया व्याकरणशास्त्रसम्मतं सामान्यं निर्वचनं वर्जयित्वा विशिष्टं निर्वचनं प्रस्तूयते एतन्नव्यनिर्वचनकौशलं श्रीमत्परमार्थानन्दस्वामिवर्याणां दृष्ट्या शब्दक्रीडनस्यानुत्तमं निदर्शनं वर्तते। इतः पूर्वं यथाप्रसङ्गं ‘स्वपितीषति क्रियापदस्य विशिष्टमद्भुतं निर्वचनमुल्लिखितमस्ति। यदा कोऽपि पुरुषः बुभुक्षितोऽस्ति तर्ह्यसौ अशिशिषतीत्येतन्नाम भवति तदशितमन्नं [पाचकरसकिण्वकशोणिता-दिलक्षणादिभिः]अद्भिर्नीयते रसादित्वेन विपरिणम्यते च।

तस्मिन्काले तद्भक्षितमन्नं जीर्णत्वं याति भुक्तेऽन्ने जीर्णे सत्येव जीवा अशितुमिच्छन्ति (ध्यातव्यमस्ति यदाप इति जलमत्र पाचकरसकिण्वकशोणितादिद्रवपदार्थवाचकं वर्तते)।

(अशन+क्यच्-स्त्रियां भावे अ इति)अशनायाशब्दः ‘अशिशिषा=अशनमिच्छा, बुभुक्षा-जिघत्सा’ इत्यस्मिन्नर्थे प्रयुज्यते ।अत्रोपनिषदा विशिष्टार्थो निरूप्यते। पुरुषेणाशितमन्नमापो द्रवीकृत्य नयन्ति तस्मादशितनेतृत्वादाप अशनायेति नाम्ना प्रसिद्धिं यान्ति। अश =अन्नम्, नायः=नयतीति नायः [अर्थात् अन्नं नयति। तद् रसादित्वेन परिणमय्य शरीरस्य विभिन्नान्यङ्गानि प्रापयति इत्थं शरीरं परिपोषयति च]तस्माज्जलं ‘अशनायः’ इत्युच्यते ]अस्मिन् सन्दर्भे केचन दृष्टान्ता महर्षिणोद्दालकेन प्रस्तूयन्ते।यथा गां नयतीति गोनायः अश्वं नयतीति अश्वनायः पुरुषान्नयतीत्यसौ (राजासेनापतिर्वा)पुरुषनाय इत्युच्यते एवम्प्रकारेण अशितं नयतीति अशनायः(विसर्जनीयलोपेन) व्याह्रियते। अद्भिरस्सम्प्राप्य रसादिभावमन्नं शरीरमिदं वटबीजाङ्कुरवदुद्भावयति वटबीजाङ्कुरवत्कार्यत्वाच्छरीरमेतत् हे सोम्य! मूलरहितं न भवितुमर्हति।इत्युक्तश्श्वेतकेतुर्वदति यद्येवं शरीरमेतत्समूलं वर्तते तर्ह्यस्य क्व मूलं स्यात्? ‘एवं पृष्टः पिता काक्वा व्याहरति,’ तस्य क्व मूलं स्यादन्यत्रान्नादिषति[अन्नं वर्जयित्वाऽन्यत्र क्वापि मूलं नास्तीत्यभिप्रैति )। कथमन्नं मूलं शरीरशुङ्गस्य? यदन्नमश्यते प्राणिभिस्तदद्भिर्द्रवीक्रियते जठराग्निना पच्यते तदा (पुरुषेणाशितमन्नं) रसादिक्रमेण परिणतं सद्वीर्यं भवति एवम्प्रकारेण स्त्रिया भुक्तमन्नं रसादिक्रमेण परिणतं भूत्वा लोहितं (रजो) भवति तदा रजोवीर्यसंयोगेनान्नमूलको देहशुङ्गस्समुत्पद्यते।।ध्यातव्यमस्ति यदत्र शुङ्गं मूलञ्चेति पदद्वयं यथासङ्ख्येन कार्यं कारणञ्चेत्यवगम्यते [शुङ्गत्वम्= कार्यत्वं मूलत्वम्=कारणत्वमिति विज्ञेयम्।]

अन्नशब्देन पृथ्वीतत्त्वं गृह्यते।अन्नदृष्ट्या शरीरं तत्कार्यं वर्तते कार्यत्वादेतच्छरीरं स्वकारणादन्नादभिन्नं भवत्यतो वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति न्यायेन निरस्तं भवति किन्त्वन्नमपि जलमूलकत्वात्कार्यं वर्ततेऽतो निरस्तं स्यात् कारणरूपजलमवशिष्यते च किन्तु जलमपि अमूलं नास्ति यद्येवं तर्ह्यस्य किं तन्मूलं भवितुमर्हति? इति पृच्छायां सत्यामाह ‘तेजः[अग्निः )एव जलस्य मूलं (कारणम्)’ इति। किन्तु तेजोऽपि विनाशोत्पत्तिमत्त्वाद्बीजाङ्कुरवत्कार्यं वर्तते ऽत एतन्नाममात्रमित्यवधार्यते यद्येवं तर्ह्यस्य मूलं किं वर्तते? परमार्थसत्यं सद्वस्त्वेवास्य मूलं( कारणं)भवतीति निश्चप्रचम्।

यस्मिन् [सद्वस्तुनि]निखिलनामरूपात्मकजगदिदमध्यस्तं भवति यस्याधिष्ठानभूतस्य तत्त्वस्य ज्ञानेन सर्वेऽध्यस्तपदार्थास्तथैव निवर्तन्ते यथा रज्ज्वाद्यधिष्ठानबोधेन सर्पादिभ्रमबुद्धिर्निरस्यते तदेव सन्मात्रं वस्त्वात्मतत्त्वं (ब्रह्म)सर्वेषां मूलं भवत्यतस्सर्वे सन्मूलाः(सदेव मूलं भवति येषां ते सन्मूला इत्यर्थो बहुव्रीहिसमासेनावगन्तव्यः।) इत्थं महर्षिरुद्दालको निगदति -सोम्येमाः सर्वाः प्रजाः सन्मूलाः(हे सोम्य ! इमाः सर्वाः प्रजाः सन्मूलाः) सदायतनाः सत्प्रतिष्ठाः।अत्र सन्मूलाः सदायतनाः सत्प्रतिष्ठा इति पदत्रये बहुव्रीहिसमासो विद्यते।

सन्मात्रमेव मूलं भवति यासां (सर्वासां प्रजानाम्)ताः (सर्वाःप्रजाः)सन्मूलाः सत्कारणाः। सर्वासां प्रजानां मूलं (उत्पत्तिस्थानम्=स्रोतः) वर्ततेऽतःसर्वाः प्रजाः सन्मूलाः सन्ति। इत्थं सदेव आयतनं (आश्रयो)वर्तते यासां प्रजानां ताः सर्वाः प्रजाः सदायतनाः(सदाश्रयाः)भवन्ति।सत्तत्त्वमनाश्रित्य प्रजानां सत्त्वं (स्थितिः)नास्ति यथा मृत्तिकाऽश्रयणं विना घटादेस्सत्त्वं न संभवति।तस्मात् सर्वाः प्रजाः सदायतनाः [सदाश्रयाः] इत्यवगन्तव्यम्।एवम्प्रकारेण सदेव प्रतिष्ठा यासां ताः ( सर्वाः प्रजाः) सत्प्रतिष्ठाः(प्रतिष्ठा=लयः,समाप्तिः, अवसानमित्यभिप्रायः)। सर्वाः प्रजाः सत्तत्व एव लीयन्ते (पर्यवस्यन्ति) तस्मात् सर्वाः प्रजाः (प्राणिनः) सत्प्रतिष्ठाः सन्तीत्यवधार्यते।

अत्र सद्वस्तुनस्तटस्थलक्षणमुपपादितं भवति।सद्वस्त्विति किम्? इति जिज्ञासायां सत्यां वक्तुं शक्यते यद् यस्मान्निखिलनामरूपात्मकजगदिदं जायते येनैतत् स्वास्तित्वं बिभर्ति यस्मिन्नेतल्लयं याति तत्सद्वस्त्विति कथ्यते लौकिकैर्दृष्टान्तैरपि एतत्प्रमाणितं भवति। तरङ्गा जलादुत्पद्यन्ते जलमाश्रित्य ते स्थिता भवन्ति जल एव लीयन्तेऽतो जलं तेषामुद्भावकं स्थितिलयकारकञ्च। इत्थं जलवन्मूलत्वात्सद्वस्तु जगदुद्भवस्थितिलयकारणं भवति।

सृष्टिक्रमसारिणी

सत्तत्त्वम्(ब्रह्म)।

तेजः[अग्निः]।

आपः(जलम्)।

अन्नम्[पृथ्वी]।

शरीरम्

ततो जलशुङ्गद्वारेण श्वेतकेतुं प्रति सतो मूलज्ञापनाय महर्षिरुद्दालको व्याहरति-‘अथैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति’

[छा.उ.६.८.५]।

गोनायोऽश्वनायःपुरुषनायश्च जनैः कथ्यन्ते।

ध्यातव्यमस्ति यत्सामान्यनिर्वचनानुगुणमुदन्याशब्दः पिपासापर्यायः।तृषा पानेच्छा उदकेच्छादीनि (शब्दस्यास्य)पर्यायान्तराणि विद्यन्ते।किन्त्वत्र विशिष्टनिर्वचनपद्धतिमाश्रित्य जलं नयतीत्यद्भुतं निर्वचनं क्रियते।उद =(उदकस्य संक्षिप्तं रूपम्)न्या=नयति इत्थमुदकं नयतीत्युदन्यम्[तेजः(वैश्वानरोऽग्निः)]प्रयोगोऽयं छान्दसः (अग्नेरर्थे)इति शाङ्करभाष्यम् ; ‘उदन्येतिच्छान्दसं तथापि पूर्ववदि’ ति,तत्रैव,६.८. ५)। पूर्ववत् अर्थादन्नम्(अशनम्)इत्यस्य नेतृत्वाज्जलमशनायमितिवत्। द्रवीकृतमशितमन्नं नयति यज्जलं तच्छोष्यतेऽग्निनाऽन्नाङ्कुरभूतं देहमार्द्रीकृत्य शिथिलीक्रियते च। अग्निना जले शोष्यमाने सत्येव पुरुषस्तृषामनुभवति।

‘तस्य(शरीरस्य)क्व मूलं स्यादन्यत्रान्नात्?(छा.उ.६.८.४)ष्इत्यत्र काक्वाऽन्नमेव शरीरस्य मूलमित्युक्तं भवति किन्तु पञ्चमे मन्त्र उदन्यासन्दर्भे[तत्तेज आचष्ट उदन्येति तत्रैतदेव(जलरूपस्य मूलस्य)शुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यतीति] इत्यभिहितं भवति अर्थात् हे सोम्य! तस्मात् (जलरूपान्मूलात्)एतच्छरीरूपाङ्कुरस्समुत्पन्नोऽभवदित्येवं विज्ञेयम्।एतच्छरीरममूलं न भवितुमर्हति।अस्य किं मूलम्? इति पृष्टः पिता महर्षिरुद्दालको ऽग्रे वदति -‘तस्य क्व मूलं स्यादन्यत्राद्भ्यः?’ अर्थाद् हे सोम्य!तस्य (जलपरिणामभूतस्य शरीरस्य)जलं वर्जयित्वा कुत्र मूलं भवितुमर्हति? कुत्रापि जलं व्यतिरिच्य तस्य मूलं नास्तीति व्यज्यते किन्तु जलमप्यमूलं न वर्ततेऽतो निगदति -‘हे प्रियदर्शन ! जलेन शुङ्गेन तेजोमूलं ,तेजसा शुङ्गेन च सन्मूलमन्विष्यताम् (छा. उ.६.८.६)।’

‘अन्विच्छ’ इति लोट्लकारात्मकस्य क्रियापदस्य पञ्चकृत्वः प्रयोगस्सन्दृश्यते यन्माध्यमेन ‘सावधानं सम्यक्सन्धानं क्रियताम् ‘इति निर्देशः ध्वन्यते।अतो जलस्य कार्यभूतं यच्छरीरं वर्तते तन्माध्यमेन तन्मूलं जलं ज्ञायते जलेन शुङ्गेन तन्मूलं तेजो बोध्यते तेजसा शुङ्गेन तन्मूलं सन्मात्रं ब्रह्मावगम्यते च। इत्थं तेजोऽबादिमयं यच्छरीरशुङ्गं वर्तते तन्मूलं परमार्थसत्यं निर्भयं निरञ्जनं निर्विकारं सन्मूलं ज्ञातव्यमित्येवं स्वपुत्राय श्वेतकेतवे विनिवेद्य महर्षिरुद्दालको निगदति -हे सोम्य!

एतासां सर्वासां प्रजानां सदेव मूलं (कारणभूतपरमार्थसत्यम्)अतस्ताः सर्वाः प्रजाः सन्मूला वर्तन्ते सदेवायतनम्-आश्रयो विद्यते यासां प्रजानां तास्सदायतनाः कथ्यन्ते सत्त्वत्त्वमेव प्रतिष्ठा -लयस्थानं भवति यासां तास्सत्प्रतिष्ठास्सन्ति।

हे सोम्य!तेजोजलान्नाख्यानां सम्प्राप्तपुरुषाणां तिसृणां देवतानामेतासां प्रत्येकं त्रिवृत्त्रिवृदेकैकीभवनं पूर्वमेवोक्तं भवति अर्थात् त्रिवृत्करणप्रक्रिया पूर्वमेव निगदिताऽस्ति।

[अध्यायस्यास्य तृतीयखण्डे द्वितीयतृतीयमन्त्रयोःप्रक्रियामिमां प्रति सङ्केतयति छान्दोग्यश्रुतिः।

‘बहु स्याम्’ इति कृतेक्षणया ‘तासां त्रिवृतं त्रिवृतमेकैकां करवाणि’ इति विहितसङ्कल्पया सन्नामिकया देवतयाऽव्याकृते नामरूपे ऽभिव्यक्तीकृते । कथमतिसृषु देवतासु जीवेनात्मनानुप्रवेशपुरस्सरया।सा देवता तासां त्रिवृतं त्रिवृतमेकैकां कृतवती (छा.उ.६.३.२-३)]

[त्रिवृत्करणप्रक्रियानुरूपमग्निजलपृथिवीनां प्रत्येकमर्धांशो भवति अवशिष्टयोर्द्वयोश्च चतुर्थांशो भवति।अत्र तालिकेयं प्रस्तूयते -

सत्तत्त्वम्।

अग्नितत्त्वम् १/२ जलम् १/४ अन्नम् (पृथिवी) १/४

जलतत्त्वम् १/२। अग्निः १/४ पृथिवी १/४

पृथिवीतत्त्वम् १/२ अग्निः १/४ जलम् १/४

अन्यत्र पञ्चीकरणप्रक्रियानुसारेण सत्तत्त्वादाकाश आकाशाद्वायुर्वायोरग्निरग्नेर्जलं जलात्पृथिवीतिक्रमेण सृष्टिर्वर्णिता भवति।अत्र त्रिवृत्करणश्रुतिः पञ्चीकरणप्रक्रियाया उपलक्षणमभ्युपगम्यते। तात्पर्यतः त्रिवृत्करणश्रुतिः प्रक्रियाद्वयं बोधयति।

सत्तत्त्वम्।

(१)आकाशतत्त्वम्

आकाशः१/२ वायुः १/८ अग्निः [तेजः] १/८ जलम् १/८ पृथिवी १/८

(२)वायुतत्त्वम्

वायुः१/२ आकाशः १/८ अग्निः१/८ जलम् १/८ पृथिवी १/८

(३) अग्नितत्त्वम्

अग्निः१/२ आकाशः१/८ वायुः१/८ जलम्१/८ पृथिवी१/८

(४)जलत्त्वम्

जलम् १/२ आकाशः १/८ वायुः१/८ अग्निः १/८ पृथिवी १/८

(५)पृथिवीतत्त्वम्

पृथिवी १/२ आकाशः १/८ वायुः १/८ अग्निः १/८ जलम्१/८

उत्क्रान्तिगतिक्रमनिरूपणम्

‘सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्याम् देवतायाम्’

अनुवर्तिष्यते



# पुरीस्था रथयात्रैषा यात्रा विश्वे बृहत्तमा


प्रो. बनमाली बिश्वाल:

प्रो. बनमाली बिश्वाल:
यात्रा बहुविधा लोके नैके यात्रोत्सवाः पुनः।
पुरीस्था रथयात्रैषा यात्रा विश्वे बृहत्तमा।।
दशावतारयात्रेयं यात्रा च गुण्डिचाभिधा।
एषा नृसिंहयात्राऽस्ति तस्याः नामान्तराणि वै।।
रथयात्रा न सामान्या सामान्यं न प्रयोजनम्।
भावना यादृशी यस्य तादृशी तत्कृते च सा।।
सांस्कृतिकी च यात्रेयं सामाजिक्यपि सर्वथा।
आध्यात्मिक्यस्ति यात्रेयं यात्रा दार्शनिकी क्वचित्।।
ईश्वरस्यात्र जीवेन भवेत् साक्षाच्च मेलनम्।
यथार्थानुभवश्चायं कर्मभक्त्योश्च मिश्रणात्।।
मानवीकरणं चात्र देवस्याहो सुदुर्लभम्।
स्वयं बहिस्समागत्य देवो ददाति दर्शनम्।।
नृत्यैश्च भक्तिगीतैश्च संकीर्तनैर्मनोरमैः।
रञ्जयितुं च देवानां मनो भक्तैः प्रयत्यते।।
घण्टामर्दलनादैश्च गोटिपुआख्यनर्तनम्।
चक्राणि भ्रामयित्वैव प्रतिभां दर्शयन्ति के।।
पुरुषाः गोपिकाभूय राधाभूय क्वचित् पुनः।
नृत्यन्त्येवं यथा कृष्णो विराजते रथे स्वयम्।।
रथारूढास्समे देवाः पहण्डिविजयोत्तरम्।
पहण्डेस्तु शुभारम्भस्सुदर्शनेन जायते।।
तत्परं बलभद्रस्तु सुभद्रा च ततः परम्।
अन्ते देवो जगन्नाथः रथयात्राक्रमोऽप्ययम्।।
स्नानाख्यपूर्णिमायां च स्नात्वा शीतजलेन वै।
मानववदनारोग्यैर्देवा भवन्ति पीडिताः।।
अणसरगृहे स्थित्वा रोगमुक्ता भवन्ति ते।
नेत्रोत्सवे भवत्येव नवयौवनदर्शनम्।।
गुण्डिचामन्दिरं देवाः प्रयान्ति च रथैर्नवैः।
सा प्रोक्ता रथयात्रैव भक्तैरत्र धरातले।।
नन्दिघोषे जगन्नाथः सुभद्रा दर्पदलने।
अग्रजो बलभद्रश्च तालध्वजे प्रयाति वै।।
रथेषु चौव सर्वेषु भवन्ति पार्श्वदेवताः।
मन्यते रथरक्षायै विराजन्ते रथेषु ते।।
रथाग्रे कलशाः भान्ति तदुपरि ध्वजः पुनः।
ध्वजानां कलशानां च नामानि सन्ति कानिचित्।।
यथा जनसमुद्रेऽस्मिन् नावत्रयं च भासते।
तरङ्गे च समुद्रस्य चाञ्चल्यमनुभूयते।।
प्रत्यागमनयात्रा तु बाहुडा च निगद्यते।
ततः स्वर्णवेशान्ते च निलाद्रिविजयो भवेत्।।
अधरपानपर्वापि तन्मध्ये च भवेत् पुनः।
भोजयत्यत्र लक्ष्म्यै च देवोऽपि रसगोलकम्।।

## नमामि ताण्डवप्रियम्


-ईशान तिवारी
काशी हिन्दू
विश्वविद्यालय

जले स्थले वने रणे गृहे गृहे निवासिनं
सदाप्रकाशदायकं विशालसृष्टिकारिणम् ।
वियोग-शोक-रोग-कोप-लोभ-तापहारिणं
नमामि ताण्डवप्रियं प्रचण्डरूपधारिणम्।।
अनाथनाथनायकं दिनेशचन्द्रशेखरं
समस्तलोकपालकं शिवं विनाशकारकम् ।
हिमेश्वरं शशीश्वरं रवीश्वरं नदीश्वरं
नमामि ताण्डवप्रियं प्रचण्डरूपधारिणम्।।
सदैव भङ्ग-भस्म-बिल्वपत्र-वस्त्रशोभितं
भवेश्वरं महेश्वरं विशिष्टकाव्यकारकम् ।
दयाकरं शुभाकरं सुयोगसाधकं परं
नमामि ताण्डवप्रियं प्रचण्डरूपधारिणम्।।
सुलोचनं त्रिलोचनं चिदम्बरं दिगम्बरम्
अनेकनामधारकं स्वभक्तभक्तिदायकम् ।
जगद्गुरुं जगत्प्रभुं जगत्समस्तकारणं
नमामि ताण्डवप्रियं प्रचण्डरूपधारिणम्।।
विशुद्धनीलरक्तपीतसर्ववस्त्रधारिणं
सदाक्षमालिकाकमण्डलुप्रियं सुधाधरम् ।
सुरेश्वरं महेश्वरं शिवेश्वरं गणेश्वरं
नमामि ताण्डवप्रियं प्रचण्डरूपधारिणम्।।
नरेशनाथ ! देवनाथ ! सोमनाथ ! शङ्कर !
ममेश ! नाथनाथ ! विश्वनाथ ! मानरक्षक ! ।
हर ! प्रभो ! हर द्रुतं ममाखिलां तु मन्दतां
प्रदेहि सद्विवेकमेव शिष्यकाय मे शुभम् ।।
विचित्रवेशभूषितं निशाकरं निरञ्जनं
समस्तलोकवासिनं मम प्रियं दिगम्बरम् ।
तमेव सिद्धसाधकं धराधरेन्द्रनायकं
धराधरं धरेश्वरं धुरन्धरं नमाम्यहम् ।।

# भावोदयः


डॉ० निरञ्जनमिश्रः

ललितलवंगलताचयनाद्विरतेव हि मत्कविता चपला
कचकुचकेशगुणग्रथनादपि सास्ति विरागवती विमला।
शशिकिरणावलिदीप्ततमोभवनस्थमनोजधनो रणन-
श्रवणरसग्रहणादपि सा विमुखेव विभाति तपोनिरता।।

रतिपतिकार्मुकलक्ष्यतनोर्मनसो गुणगौरवगानरति
र्विशति न तद्धृदये सततं फलतीव विभाति सदा विरतिः।
नवनयदावविदग्धतरोरिह पल्लवसंगणनाद्विरता
गरलघटादमृतद्रवलुब्धनिषादकुलेऽपि न काऽपि रुचिः।।

जनमनसो विकलस्वरताललयाश्रयणे भजतीह सुखं
खलदलचन्द्रचकोरगुणग्रहणात्तु सदैव मनो विकलम्।
मधुकरपक्षविकर्तनकौशलमुग्धमना न हि मत्कविता
कविवरमौलिमणिद्रवपानविधानविधौ हि तदीयसुखम्।।

रसिकजनोऽपि न मत्कवितानदर्शनमिच्छति चेद्धि वरं
कलुषितमानसपद्मवनेऽपि न जीवति हंसकुलस्य कलम्।
अभिमतलक्ष्यपथाद्विरता न कदापि भविष्यति मत्कविता
रसजलधेरमृतग्रहणाद्विरतेश्चरणे न कदापि सुखम्।।

यदि सा न गता नयने भवतां वद जीवनमेव कथं भवताम्।
यदि चेन्न रमारमणं रमणे  रमणोऽपि कथं रणने रमताम्।।

## जगन्नाथाष्टकम्


-डॉ. अरविन्दकुमारतिवारी

पुरीस्थो दिल्लीस्थो निखिलभवसंस्थो हृदयगो
दयानन्दोऽद्वन्द्वो विनतजननन्दोऽन्धनयनः।
धराधीरो वीरो निगमगुणकीरो हरिवरो
जगन्नाथोऽनाथं जगति कविनाथं वितनुताम्।। १

सुभद्रा भद्राणां भ्रमरभयभीतिप्रमथनी
स्वसा शान्ताक्लान्ता विकलजनसन्तापहरणी।
द्वयोर्बन्ध्वोर्मध्ये विलसति विभावीचिभगिनी
जगन्नाथप्रीत्या हलधरकृपासिन्धुतटिनी ।। २

गदावीरोऽरीणां कृषिविभवगोप्ता हलधरः
कुशाग्रः सर्वाग्रः सकलनयपाता बुधवरः।
स मां राजन्मायापतिकरधरः श्रीगणधरो
जगन्नाथभ्राता भ्रमयतु महीमण्डलचरः । ३

भजद्भक्तप्राणप्रणयपरिणामादिरचनां
श्रयत्साधूत्साहद्रुमविपिनकौटीरसुखजित्!
पताका कामानां वहदनिलवेगं जितवती ।
जगन्नाथस्थाने भुवनजयिनीयं विजयते ।। ४

गणोशो द्वारस्थः क्वचिदपि शिवो दर्शनधिया
तव द्वारे दृष्टस्त्रिपुरदहनो मन्दिरहरः।
जयं कारं कारं सरति जनसङ्घः परिसरे
जगन्नाथानिद्र! भ्रम विहरतां भक्तिसदने।। ५

महापुर्याः शोभा सकलपुरशोभां हरति ते
तृतीये द्वारे सासितयमशिला विस्मयकरी।
महामृत्युं लोको तरति भगवद्दर्शनवशाज्
जगन्नाथालोको रविशशिविभां निन्दतितराम्! ६

महार्चायां वाद्यं विविधरवपूर्णं  जनमनः
प्रभो! कर्षद् हृद्यं श्रुतविवरमाविश्य हृदयम्।
नृतालं भक्तानामुषसि तव निद्रां स्पृशति यज्
जगन्नाथ! श्रव्यं तनुत इव पुण्यं श्रुतवताम्।। ७

रथारूढो द्रष्टुं पथि पथि जनानां करगुणैः
समकृष्टो भक्तं सुकविकुलकान्तं क्वचिदिमिमम्।
सहस्राक्ष! प्रायः कथमपि च मां द्रक्ष्यसि ततो
जगन्नाथानन्त! प्रमथपतिनाथासि सदयः।। ८

जगन्नाथाष्टकं सृष्टमरविन्दतिवारिणा।
यः पठेत् तस्य सर्वत्र मङ्गलं कुरुते हरिः।। ९
आषाणशुक्लपक्षस्य प्रतिपद्गुरुवासरे।
जगन्नाथः स्तुतः कुर्यादरविन्दे ध्रूवं कृपाम्।। १०

# अथ श्रीजगन्नाथपञ्चकम्


डॉ.शशिकान्ततिवारीशशिधरः
राजकीयसंस्कृतकॉलेज, पटनाः

रमेशश्चक्रेशः फणपतिशयानः प्रभुवरः
सुरेशस्सिद्धेशः कमलदलनाभोम्बुसदृशः।
हरिर्दीनानाथस्सुरपतिविभुर्भक्तवशगो
जगन्नाथो देवो भवतु मयि कृष्णोद्य मुदितः।।०१।।

जगद्भर्ता पूज्यस्सकलसुखकर्त्ता प्रभुरसौ
जगत्सृष्टेर्मूलो भवविभवदाता सुरवरः।
जगत्सत्यस्वामी लसतु हृदये यादवपतिः
जगन्नाथो देवो भवतु मयि कृष्णोद्य मुदितः।।०२।।

विरिञ्चिस्सेवायां तव भवति लग्नश्च नितरां
हरस्त्वां ध्याने स्वे प्रतिपलमहो पश्यति हरिम्।
त्वदीयं माहात्म्यं कथयति सदा नारदमुनिः
जगन्नाथो देवो भवतु मयि कृष्णोद्य मुदितः।।०३।।

अहं भक्तस्स्वामी त्वमसि मम देवश्शिवकरः
सुतोहन्ते तातस्त्वमसि मम सम्पालकवरः।
प्रजाहन्ते राजा त्वमसि मम संरक्षकवरः
जगन्नाथो देवो भवतु मयि कृष्णोद्य मुदितः।।०४।।

रथोरूढं दृष्ट्वा तव सुखदरूपं मन इदं
वशे नैवं सत्यं कुरु मयि दयां पादपतिते।
जगत्यक्त्वा प्राप्तस्तव शरणसिन्धुश्शशिरहं
जगन्नाथो देवो भवतु मयि कृष्णोद्य मुदितः।।०५।।

जगन्नाथस्य देवस्य पञ्चकं यः पठेन्नरः
श्रद्धया भक्तिभावेन तस्मिन्विष्णुः प्रसीदति।।

## संस्कृतमेव पठ त्वम्

अयि सखे! संस्कृतमेव पठ त्वम्
वेदशास्त्रव्याकरणविलसितं सत्साहित्यविकसितं
भारतीयसंस्कृतिसम्पोषणरक्षणसेवनलसितम्
अयि सखे! संस्कृतमेव.................

कालिदासकविवर्यविरचितं श्रेष्ठरसादिसुभरितं
अभिज्ञानशाकुन्तलसदृशं नाटकमत्र न दिव्यम्
अयि सखे! संस्कृतमेव.................

का मर्यादा किं कर्तव्यं सर्वं ज्ञास्यसि शीघ्रं
कविवाल्मीकिविरचितं दिव्यं पठ रामायणमेकम्
अयि सखे! संस्कृतमेव.................

लोभमोहपरिणामं ज्ञातुं भ्रातृद्वेषमभिगन्तुं
वेदव्यासविरचितं काव्यं महाभारतं दिव्यम्
अयि सखे! संस्कृतमेव.................

कालमुहूर्तनक्षत्रदेवताज्ञानमपि ह्यनिवार्यम्
अतः पठ त्वं ज्यौतिषशास्त्रं ज्ञातुं नैजभविष्यम्
अयि सखे! संस्कृतमेव.................

ग्रहपीडागतजनितं दुःखमपाकर्तुमिह शीघ्रं
कर्मकाण्डसदृशविषयं त्वं पठ नितरामिह दिव्यं
अयि सखे! संस्कृतमेव.................

आत्माजीवजगज्जगदीश्वरसुखदुःखादिसमस्तं
ज्ञातुं मोक्षमपि प्राप्तुं व्रज दर्शनशास्त्रशरण्यं
अयि सखे! संस्कृतमेव.................

नैकपुराणधर्मशास्त्राण्यपि विद्यन्ते तव पुरतः
यानि पठित्वा मानवजीवनमिह संयाति  सुफलं
अयि सखे! संस्कृतमेव.................

नवनवशाब्दमहो निर्मातुं वाणीं शुद्धां कर्तुं
दिव्यं व्याकरणं खलु शास्त्रं पठ्यं त्वया निवार्यं
अयि सखे! संस्कृतमेव.................

आगमनिगमकोषसम्भाषणकवितानाटकयुक्तं
क्षेत्रं संस्कृतमयं विशालं सत्सौभाग्यविधानं
अयि सखे! संस्कृतमेव.................

# सूर्यस्वरूपाद्वृष्टियोगः

–डॉ. लक्ष्मीकान्तविमलः

श्रीशंकरशिक्षायतनेनवैदिकशोधसंस्थानेननवदेहलीस्थितेन-जूनमासस्य३०त्तमे दिनांकेसोमवासरेसायंकाले ५-७वादनपर्यन्तम्अन्त-र्जालीयमाध्यमेन 'कादम्बिनी : रविकराध्यायविमर्शः' इति नाम्नाराष्ट्रिया संगोष्ठी आयोजिताआसीत्। पण्डितमधुसूदन-ओझामहोदयस्यकादम्बिनीग्रन्थस्यरविकराध्यायेएतेविषयाः




वर्णिताः सन्ति-प्रत्यर्कपरिधिः,परिवेषः,इन्द्रायुधं, दण्डः, त्रिशूलं, मत्स्यः, अमोघः। एतद्विषयमधिकृत्यनिमन्त्रिताःविद्वांसःविषयविश्लेषणंकृतवन्तः।

बिहारप्रदेशस्यमुजफ्फरपुर-नगरस्य धर्म- समाज-संस्कृत-महाविद्यालयस्यज्योतिषविभागस्यसहायकाचार्यःडॉ. निगमपाण्डेयमहोदयः स्ववक्तव्येकथितवान्यत्प्रत्यर्कपरिधेः शब्दस्यअर्थः सूर्यस्यकिरणस्यआयामः परिधिः अस्ति।परिधिरयंसूर्यकिरणात्गोलाकारः एव अस्ति। यदि सूर्यकिरणः समभावे, स्निग्धरूपे, ऋतुभावानुकूलेस्यात्तर्हिअयंप्रत्यर्कपरिधिः शुभप्रदःस्यात्। प्रत्यर्कपरिधिः वैदूर्यमणिप्रभायुक्तः स्वच्छःश्वेतःस्यात्तर्हिसुवृष्टिर्भवेत्कल्याणकरश्चभवेत्।

**प्रतिसूर्यःसमःस्निग्धःस्वर्तुवर्णःप्रशस्यते।**
**वैदूर्याभःसितःस्वच्छःसुभिक्षंक्षेममावहेत् ॥**

कादम्बिनीपृ. १५६ का.१४६

परिवेषंस्पष्टीकुर्वन्ग्रन्थकारःकादम्बिन्यांलिखतियत् आकाशेसूर्यः चन्द्रमाःतिष्ठति। वायुनासूर्यस्यचन्द्रमसःकिरणःप्रतिमूर्छितोभवति। वायोःकिरणस्यपरस्परेणप्रतिघातेनएकःगोलाकारःपिण्डस्वरूपःउत्पद्यते। स एवपरिवेषः। परिवेषस्यआधारेणवृष्टेःअनुमानंजायते।

**रवेरिन्दोः करा व्योम्निवायुनाप्रतिमूर्छिताः।**
**सूक्ष्मेऽभ्रेमण्डलीभूताःपरिवेषाख्ययामताः॥**

तत्रैव,पृ. १५६ का.१४९

हरियाणाप्रदेशस्यकैथलनामकेस्थानेमहर्षि-वाल्मीकि-संस्कृत-विश्वविद्यालयस्यज्योतिषविभागस्यसहायकाचार्यःडॉ. नरेशशर्ममहोदयः स्वकीयेसारगर्भितेव्याख्यानेवृष्टिप्रदायकस्यपरिवेषस्यउपस्थापनंकृतवान्। सूर्यस्यचन्द्रमसः किरणस्यकुण्डलाकारंएकं लघु बृहच्चआकारंसमायाति। यत्रस्थानेकुण्डलम् आकारंजायतेतत्रसमुचितावृष्टिःजायते। सूर्यस्यचन्द्रमसः किरणेनकुण्डलंभवति। यदि अस्मिन्कुण्डलेपञ्चवर्णाः स्युः तर्हिदिनत्रयंयावत्समुचितावृष्टिः भविष्यति, एतादृशी परिकल्पना कृता अस्ति।

**द्वेद्वेक्षुद्रविशालेचेत्कुण्डलेसूर्यचन्द्रयोः।**
**बहुवृष्टिरनेकाहं तदा तत्रभविष्यति ॥**
**द्वेद्वेसूर्यस्यचन्द्रस्यकुण्डलेपञ्चवर्णके ।**
**त्र्यहंयावत्तदातत्रबहुवृष्टिर्भविष्यति ॥**

तत्रैव, पृ. १५७ का.१६१-१६२

हिमाचलप्रदेशे केन्द्रीय-संस्कृत- विश्वविद्यालयस्यवेदव्यासपरिसरस्य-ज्योतिषविभागस्यसहायकाचार्यः डॉ. विनोदशर्ममहोदयःइन्द्रायुधम्अधिकृत्यव्याख्यानम् अकरोत्। इन्द्रायुधंप्रकारद्वयम् अस्ति। एकंधनुः द्वितीयस्तुऐरावतगजः। सूर्यस्यकिरणेप्राणःविद्यते। स किरणःप्रकाशः अस्ति। स एवप्रकाशः इन्द्रः अस्ति। अनेनप्रकारेणग्रन्थकारः इन्द्रस्यव्युत्पत्तिंनिरूपयामास। वायुबलेनसूर्यस्यकिरणः जले प्रविशति। जलस्यवायोः परस्परंसंमेलनेनसप्तवर्णाःविकसन्ति। सप्तवर्णात्मकम्इन्द्रस्यधनुः आकाशेवयंपश्यामः।

**इन्द्रायुधंतुद्विविधंधनुरैरावतं तथा ।**
**इन्द्रःसूर्यकरस्थानःप्राणेयोऽयंप्रकाशते॥**
**नीरांतराः करा भानोःपवनेनविघट्टिताः।**
**सप्तवर्णाधनुःसंस्था दृष्टा इन्द्रधनुर्मतम्॥**

तत्रैव,पृ. १५८ का.१७४-१७५

त्रिपुराप्रदेशे केन्द्रीय-संस्कृत-विश्वविद्यालयस्यएकलव्यपरिसरस्य ज्योतिषविभागस्यसहायकाचार्यःडॉ. दिवेशशर्ममहोदयः वक्तृरूपेणविषयस्यंउद्घाटनंकृतवान्। तेनउक्तंयत्कादम्बिनीग्रन्थ-स्यविषयोऽयंसूर्यकिरणाधारितःविद्यते। सूर्यात् या रेखा समायाति, सा रेखा अमोघनाम्नाविज्ञायते। तस्याःरेखायाः अग्रः भागःखण्डितःस्यात्तस्यैव नाम दण्डः अस्ति। सूर्यात्निःसृतायाःरेखायाःसंख्याःतिस्रः स्युः तर्हि सा संख्या त्रिशूलम् अस्ति। सूर्यतःभिन्नभागात्समायातेद्वेरेखेउत्पद्येते। तस्यारेखायाःमत्स्य-स्वरूपःसञ्जायते। अत्रपदार्थचतुष्टयेनवृष्टेः परिकल्पना कृता अस्ति।

**सूर्यात्समुत्थितारेखाऽमोघइत्यभिधीयते ।**
**सोऽग्रेणखण्डितादण्डस्तिस्रोरेखास्त्रिशूलकम्॥**
**द्वाभ्याममोघ-रेखाभ्यांभिन्नदिग्भ्यांतुमस्तकः।**
**सत्स्वप्येवंविशेषेषुसांकर्येणोच्यतेफलम्॥**

तत्रैव,पृ. १६० का.१८६

जवाहर-लाल-नेहरू-विश्वविद्यालयस्यसंस्कृत-एवं-प्राच्यविद्याध्ययन-संस्थानस्यआचार्यःप्रो. सन्तोषकुमारशुक्लमहोदयः कार्यक्रमस्यः अध्यक्षः आसीत् । तेनभणितंयत्सूर्यस्यकिरणबलात्परिधिःनिर्मीयते। सूर्यः बिम्बः अस्ति। तस्यसूर्यस्यदूरप्रदेशेप्रतिबिम्बः भवति। बिम्बात्मकस्यसूर्यस्यकिरणात् एवपरिधिःजायते। यदि अयंपरिधिःसूर्यस्यद्वयोःभागयोःव्याप्तःस्यात् तदा समुचितावृष्टिर्भविष्यति। यदि अयंपरिधिःअभितःसूर्यस्यात् तदा वृष्टिःसमुचिता न भविष्यति।

**बिम्बान्वितौतुपरिधीरवेरुभयपाश्वगौ ।**
**बहुतोयौनिर्जलस्तुसर्वदिक्पर्यवस्थितः॥**

तत्रैव, पृ. १५६ का.१४८

सूर्यकिरणाद्एवकुण्डलंसदृशम् आकारम् आकाशेजायते। यदि सूर्यस्यइदंकुण्डलंपञ्चवर्णात्मकंस्यात् तदा आकाशेअधिकःमेघःभविष्यति तथा च वृष्टिरपिप्रभूता भविष्यत

**सूर्यस्यकुण्डलंपञ्चवर्णचेद्बहुविस्तृतम् ।**
**तदा घनघटाटोपोबहुवृष्टिश्चजायते ॥**

तत्रैव, पृ. १५८ का.१६८

केन्द्रीयसंस्कृतविश्वविद्यालयस्यजयपुरपरिसरस्यवेदविभागस्यसहायकःआचार्यःडॉ राहुल-कुमार-मिश्र-महोदयः, सस्वरंवैदिकमङ्गलाचरणंकृतवान्। कार्यक्रमस्यसञ्चालनंश्रीशंकरशिक्षायतनस्यवैदिकशोधसंस्थानस्यशोधाधिकारी डॉ. लक्ष्मीकान्तविमलःकृतवान्। अस्मिन्कार्यक्रमेविविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्यमहाविद्यालस्यआचार्याःशोधच्छात्राः विषाया-नुरागिणश्चसोत्साहंभागंगृहीत्वासंगोष्ठींसफलीचक्रुः।




# संगमस्य गरिमापूर्णः अलंकरणसमारोहः सुसम्पन्नः

(आचार्य ओमप्रकाशः श्राहीश)

हिमाचलप्रदेश-सिरमौर-कला-संगमस्य षट्षष्टितमः अलंकरणसमारोहः जून-मासस्य अष्टाविंशतितमे दिनांके सिरमौर-जनपदस्य बायरी नाम्नि गुरुधाम्नि सोत्साहं सुसम्पन्नः यस्मिन् हिमाचल-हरियाणा-उत्तराखंडप्रान्तानामेकादश विशिष्टाः जनाः विविधासु विधासु तेषां योगदानाय माला-पदक- सत्साहित्य-अंगवस्त्र-स्मृतिचिन्हादिभिः समलंकृताः । समारोहस्य मुख्यातिथयः स्वनामधन्याः विद्वद्वरेण्याः अन्ताराष्ट्रियसाहित्यकाराः उत्तराखण्ड-संस्कृत-विश्वविद्यालये सेवारताः माननीयाः दिनेश चन्द्र चमोला 'शैलेश' महाभागाः




समारोहस्याध्यक्ष-महोदयैः माननीयैः राजेन्द्र तिवारी महाभागैः विशिष्टातिथिभिः हिमवन्ती-मीडिया-प्रमुखैः अरविन्द गोयल महाभागैश्च सह मिलित्वा दीपप्रज्ज्वलनपुरस्सरं विधिवत् समारोहस्य शुभारम्भं कृतवन्तः।

संगमस्य महासचिवः दिनेश ताशः अभ्यागतानां स्वागतमकरोत् । ततश्च कार्यकारी अध्यक्षः 'ब्रह्मवंशसमुत्पन्नं वशिष्ठकुलभूषणम् चन्द्रमसः कलापूर्णं गुरुं चन्द्रं वयं नुमः' इत्यादिभिः दशपदैः ब्रह्मलीनं ब्रह्मर्षिपदमंडितं गुरुवरं वशिष्ठं प्रणम्य समारोहे सम्मान्यानामेकादश विभूतीनां परिचयं विस्तरेण प्रतिपादितवान् । प्रकाशः भारती 'गुरुवर तुम्हें नमन है गुरुदेव तुम हमारे/सदा साथ साथ रहना बनकर तुम सहारे' भजनं गुरुवरं समर्प्य वशिष्ठविरचितां 'पाई गोयणी दी पींगो बादले...' पहाड़ीगीतिकामपि प्रस्तुतवान्। मध्ये-मध्ये सिमरन भारती-रामकिशन-जीतसिंह चौहान-किरनेश पुण्डीरादिभिः कलाकारैः प्रस्तुतेन सुगम-शास्त्रीय-लोकसंगीताधारितेन कार्यक्रमेण समारोहस्य शोभा चतुर्गुणिता जाता ।

अस्मिन्नवसरे अद्य सम्मानितेन वैदिकगणभारतस्य संस्थापकाध्यक्षेण वत्स-देशराजशर्मणा सम्पादितस्य 'राष्ट्रसेवापराङ्मुखः' इति नामधेयस्य समस्यापूर्तिपरककाव्यस्य विमोचनमपि जातं यस्मिन् न केवलं भारतस्य उडीसा-बिहार-दिल्ली- महाराष्ट्र-छत्तीसगढ- चण्डीगढ-हरियाणा-कर्नाटक-उत्तराखंड-असम-मध्यप्रदेश-गुजरात-उत्तरप्रदेश-हिमाचलादिप्रान्तस्थानां कवीनां कविताः संकलिताः सन्ति अपितु नेपाल-अमेरिकादि-अन्यदेशानां रचनाकाराणां रचनाः अपि संकलिताः सन्ति । अनेन सममेव विशेषेण अवसरमेनमधिकृत्य एव हिमवन्ती-मीडिया-परिवारेण प्रकाशितस्य हरिहर-विशेषांकस्य लोकार्पणमपि जातं यस्य प्रतिः समारोहस्यान्ते प्रत्येकाय उपस्थिताय जनाय निःशुल्कं वितरिता ।

अलंकरणसमारोहे साहित्यक्षेत्रे विशेष-योगदानाय अमरदेव आंगिरस-आत्मा रंजन-डॉ.अदिति गुलेरी तथा च श्रेष्ठ-पत्रकारितायै डॉ.रमेश सिंगटा 'डॉ.यशवन्तसिंह परमार' सम्मानेन सम्मानिताः । समाजसेवायै राजेश चेची-संजय कँवराभ्यां सह संस्कृत-संस्कृतिसेवायै वत्स-देशराजशर्मा 'महाराजा राजेन्द्र प्रकाश' पुरस्कारेण पुरस्कृताः । चित्रकला-क्षेत्रे दीपराज विश्वासः संगीतक्षेत्रे रामकिशनः लोकसंस्कृतिक्षेत्रे जीतसिंह चौहानः लोकसंगीतक्षेत्रे च किरनेश-पुण्डीरः श्आचार्य वशिष्ठश सम्मानेन विभूषिताः ।

मुख्य-अतिथीनां प्रो. दिनेश चन्द्र चमोला 'शैलेश' महाभागानामलंकृतेन उद्बोधनेन सर्वेऽपि श्रोतारः सुतरां प्रभाविताः । विशिष्टानां प्रमुखातिथीनामपि संगमेन स्मृतिचिह्नादिभिः अलंकरणं कृतम्। ततश्च धन्यवादज्ञापनपुरस्सरं समाप्तिं गतेन समारोहेण सर्वेऽपि उपस्थिताः रात्रिभोजं विधाय स्वं स्वमभीष्टस्थानं प्रस्थितवन्तः । नूनमेवैषः गरिमापूर्णः सम्मानसमारोहः उपस्थितानां सर्वेषां हृदयेषु चिरस्थायिनं स्थानं व्यदधात् यन्निमित्तं संगमस्य प्यासाः नूनमेव श्लाघनीयाः सन्ति।

# 'मुहूर्तस्य वैज्ञानिकविश्लेषणम्' विषयिणी एकदिवसीया विद्वत्संगोष्ठी सम्पन्ना

(जयपुरम्) भारतसर्वकारस्य संस्कृति-मंत्रालयेन च विश्वगुरुदीपाश्रमशोधसंस्थया च प्रायोज्ये ज्ञानभारतम् (राष्ट्रियपाण्डुलिपिमिशनम्, जयपुर) इति संस्थया आयोजिता पञ्चदशदिवसीया उच्चस्तरीया







पाण्डुलिपिश्रौष्ठकार्यशालाया: प्रक्रमे संस्कृतसंवादः, दिल्लीनगराधिष्ठितः, अस्य सहसंयोजकत्वेन एकदिवसीया विद्वत्संगोष्ठी आयोजिताभूत्।

उक्तसंगोष्ठ्यां 'मुहूर्तस्य वैज्ञानिकविश्लेषणम्' इति विषयो व्यापकतया चर्चितः। कार्यक्रमस्य आरम्भो दीपप्रज्वलनपूर्वकं विधिपूर्वकं सम्पन्नः। ततः सर्वे आमन्त्रिताः अतिथयः सादरं स्वागतीकृताः। ज्ञानभारतं संस्थायाः समन्वयकः डॉ. सुरेन्द्रकुमारशर्मा समागतानां विशिष्टातिथीनां भावपूर्णं परिचयं प्रदत्तवान्।

मुख्यातिथिरूपेण भाषमाणः कुलपतिः प्रो. सोमदेवशतांशुः मुहूर्तस्य प्रभावं तस्य च उपादेयतां विषये विस्तृतं व्याख्यानं दत्तवान्। तेन उक्तं यत् - 'अधुना समग्रे विश्वस्मिन् पाण्डुलिपिषु आधारितं शोधम् एकं नवीनं कीर्तिमानं स्थापयति।' तेन अपि उक्तं यत् - 'अमेरिकादेशे स्थितं नासाविश्वसंस्थानं आकाशे 'ॐ' ध्वनिम् अभिलेख्य भारतस्य ज्ञानपरम्परां प्रमाणीकृतवती। अस्य अवसरस्य विशेषत्वेन संस्कृतसंवादपत्रस्य चतुर्दशवर्षसंपूर्त्यङ्कस्य विमोचनं सम्पन्नम्। अस्य पत्रस्य प्रबन्ध-संपादकः वेदप्रकाशशर्मा संस्कृतसंवादस्य प्रकाशनयात्रायाः परिचयं प्रदत्तवान्। ततः प्रो. रामदेवसाहूः मुहूर्तस्य वैज्ञानिकदृष्ट्या विश्लेषणं कृत्वा ओझाजिना विरचितग्रन्थवस्तुनः परिप्रेक्ष्ये स्वविचारान् व्यक्तवान्।

एतस्मिन् सन्दर्भे संस्कृतसंवादेन पाण्डुलिपिमिशनेन च सहकार्येण एकविंशति संस्कृतविद्वांसः सम्मानिताः। कार्यक्रमे कार्यशालायाः अध्येताः सह जयपुरनगरस्थाः मूर्धन्यविद्वांसः अपि सस्मितं सम्मिलिताः। कार्यक्रमस्य संचालनं घनश्यामशर्मणा कृतम्। समापनं शान्तिपाठेन सम्पन्नम्।






## "योगः स्वास्थ्ययुक्ता जीवनशैली अस्ति"-प्रो. हरेराम त्रिपाठी

### "मनः, बुद्धिः, शरीरं च एषां समन्वय एव योगाभ्यासपद्धतिः"-डॉ. चन्द्रगुप्तवर्णेकरः

(रामटेकम्) कविकुलगुरुः कालिदासः संस्कृतविश्वविद्यालयः इत्यस्य योगविज्ञान-समग्रस्वास्थ्यविभागः, राष्ट्रियसेवायोजना, क्रीडाविभागः, महिलाकक्षः च एतेषां संयुक्तसंयोजनेन आन्ताराष्ट्रियोगदिवसः शनिवारं २१ जून २०२५ तमे दिनाङ्के रामटेक मुख्यालये उल्लासपूर्णतया समारोहरूपेण आयोजितः।

कार्यक्रमस्य मुख्यातिथिः आसीत् "संस्कृतं भवितव्यम्" इत्यस्य प्रकाशकः डॉ. चन्द्रगुप्तवर्णेकरः, कार्यक्रमस्य अध्यक्षता कुलगुरुः प्रो. हरेरामत्रिपाठिना कृता।

मञ्चस्थाः प्रमुखाः विद्वांसःप्रो. कविता होले, प्रो. ललिता चन्द्रात्रे, प्रो. कृष्णकुमार पाण्डे, कार्यक्रमसंयोजिका प्रो. कलापिनी अगस्ती, प्रो. हरेकृष्णअगस्ती, कुलसचिवः डॉ. देवानन्द शुक्लः,




रासेयोसंयोजकः डॉ. जयवन्त चौधरी, क्रीडाविभागाध्यक्षः डॉ. हृषिकेशदलाईः, महिलाकक्षसंयोजिका डॉ. राजश्री मेश्राम, योगविज्ञानविभागाध्यक्षः डॉ. सचिन द्विवेदी च प्रमुखरूपेण उपस्थिताः। कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनपूर्वकं सम्पन्नः। योगविभागस्य छात्रैः योगप्रदर्शनम् अपि समर्पितम्। परिचयप्रदर्शनम् भारतीयधर्मदर्शनसंस्कृतिसंकायस्य अधिष्ठात्री प्रो. कलापिनी अगस्ती महोदय्या कृतम्। तया उक्तं-"योगविज्ञानविभागेन विविधानि योगशिविराणि, परामर्शकेन्द्राणि, पाठ्यक्रमाः च आयोज्य योगस्य प्रचारः क्रियते। स्त्रीणां बालकानां च कृते विशेषं निःशुल्कं योगशिविरम् अपि आयोज्यते। अस्मद्विभागस्य छात्राः अमेरिका, ऑस्ट्रेलिया, श्रीलङ्का, अर्जेन्टिना, सिंगापुर इत्यादिषु राष्ट्रेषु योगप्रशिक्षणं ददाति। अष्टाङ्गयोगस्य प्रतीकात्मकं महत्त्वं च व्याख्यातम्।" मुख्यातिथि डॉ. चन्द्रगुप्त वर्णेकरः अवदत् यत्सार्वजनिकयोगस्य प्रथमतया प्रयोगः नागपुरे जनार्दनस्वामिना कृतः। तेनैव योगान्दोलनस्य आरम्भः अपि कृतः। अद्य यः 'विश्वयोगदिवसः' आयोज्यते, तस्य प्रमुखप्रणेता जनार्दनस्वामी एव। योगः केवलं व्यायामः नास्ति, अपि तु मनसः, बुद्धेः, शरीरस्य च समन्वय-संतुलन-सामञ्जस्यस्य अभ्यासपद्धतिः अस्ति। सततयोगाभ्यासात् कौशलविकासः भवति। योगः उपचारपद्धतिः अपि अस्ति-कैवल्यधाम-लोनावळा इत्यत्र अस्य विषये विशेषः शोधः सम्पन्नः। प्रयोगैः प्रमाणितपरिणामाः अपि प्राप्ताः। कुलगुरुः प्रो. हरेरामत्रिपाठी महोदयेन अध्यक्षीयभाषणे उक्तम्-"योगजीवनशैली स्वास्थ्ययुक्ता जीवनशैली अस्ति। सर्वे अपि एताम् अंगीकुर्वन्तु। अस्य वर्षस्य योगदिवसस्य आदर्शवाक्यम्- "योगः-एकं पृथ्वी, एकं स्वास्थ्यम्"। वयं यत् 'वसुधैव कुटुम्बकम्' इति अवधारणां स्वीक्रियामः, तस्यानुसारं सर्वेषां शांतिपूर्णं स्वास्थ्यं योगदिवसस्य मूलसन्देशः अस्ति। स्वास्थ्यसाधने प्राणायामस्य विविधरूपेषु विस्तृतं अभ्यासः अपेक्षितः। भारतीययोगपद्धतिः अन्ताराष्ट्रियपटलपर्यन्तं मान्यता प्राप्तवती। एषा भारतीयज्ञानपरम्परायाः निधिः अस्ति। शिक्षण-शोध-प्रकाशन-पाण्डुलिपिसंग्रहैः अस्य रक्षणाय यत्नः क्रियते। विभागः योगविज्ञानस्य अभ्यासस्य च समन्वयं कुर्यात् इत्यत्र सदा प्रयत्नशीलः। योगदिवसे तस्य नवीनाः उपक्रमाः अपि प्रस्तूयन्ते। योगविभागः राष्ट्रस्तरे, अन्ताराष्ट्रियस्तरे च प्रसिद्धः। मम गर्वविषयः-एतेषां सफलकार्यक्रमानां पृष्ठे प्रो. अगस्ती महोदयः तस्य च कार्यसमूहः अनवरतं श्रमं कुर्वन् अस्ति। एतेन अवसरस्य त्रैमासिकपत्रिका 'वैदर्भी' इत्यस्य विमोचनं गणमान्यजनानां हस्ते सम्पन्नम्। कार्यक्रमस्य सञ्चालनं डॉ. रेणुका करंदीकर्या कृतम्, धन्यवादज्ञापनं डॉ. सचिन द्विवेदी महोदयेन कृतम्। "शान्तिप्रार्थनया" सह कार्यक्रमस्य समापनं अभवत्।

अस्माकं प्रेरणास्रोतः- स्व.पं.रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं, वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।